ॐ

KALIDASA CHAYANI'S SUDDHICHANDRIKA

(WITH THE COMMENTARY OF SHANTI RATHA)

Foreward by

Prof. Dr. VACHASPATI SHARMA TRIPATHY

K.S.D. Sanskrit Vishvavidyalaya, Darabhanga, Bihar

and

Prof. Dr. KISHORECHANDRA MOHAPATRA

S.J.S.Vishvavidyalaya,

Srivihar, Puri, ORISSA

Edited with notes "SUDHA" and introduction

by

Dr. Jayakrishna Mishra

Reader and H.O.D.

Post Graduate Department of Dharmashastra

Srivihar, Puri

Sri Jagannath Sanskrit Vishvavidyalaya,

Srivihar, Puri, ORISSA

2002

KALIDASA CHAYANI'S
SUDDHICHANDRIKA

With the commentary of *Shanti Ratha*
with notes "SUDHA"

Publisher

Smt. Swarnalata Mishra

C/o. Dr. Jayakrishna Mishra

Sangram Club Lane

Badasankha

Puri - 752 002

First Edition

Ganesh Chaturthi, 2002

© By the Publisher

Available at

Sadgranth Niketan

Srimandir, Puri.

Printed at

Rama Press

Trimali Math, North Gate,

Puri - 752 001

Ph. - (06752) 22145, 27945

Price : Rs. 50.00 (Rupees Fifty only)

शुभाशंसा

धर्मप्रधानेऽस्मिन् भारतवर्षे वर्णाश्रमधर्मेषु आचार एव श्रुतिस्मृति-सिद्धोऽवगमकः मूलभूतश्च सनातनधर्मस्येति सुविदितचरमेव सर्वेषामपि सुधियाम् । यथाभिहितञ्च भारते भगवता व्यासेन -

''*आचारप्रभवो धर्मः धर्मस्य प्रभुरच्युतः*''इति,

''आचाराद्विच्युतो विप्रो न वेदफलमश्नुते ।'' इति च मनुः । स चायमाचारः शौचाचमनादिभेदेन वर्णाश्रमिणां भिन्नोऽभिन्नश्चांशेन । तत्रास्मिन् घोरेऽधर्मबहुले कलौ शौचेऽपि शैथिल्यदर्शने चित्तपरीक्षामाह दक्षः .

''*मुधाद्रव्येण शुद्धिः स्यान्न क्लेशो न धनव्ययः ।*
यस्य शौचेऽपि शैथिल्यं तस्य चित्तं परीक्षितम् ॥'' इति

किञ्च शिष्यमुपनीय आचार्यः सर्वादौ तं शौचं (शुद्धिं) शिक्षयेदिति उपदिशन्ति स्मृतिकाराः -

'*उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।*'

एवञ्च धर्मशास्त्रे आचारस्य, शौचस्य शुद्धेर्वा महत्त्वं नास्त्यविदितं विदुषाम् । अतएव प्रायः निखिलेष्वपि सूत्र-स्मृति-निबन्धग्रन्थेषु शुद्धाशुद्धि विवेकोऽतिवैशद्येन दृग्गोचरीभवति । उत्कलीयनिबन्धकारेषु गदाधरराजगुरोः ''शुद्धिसारः'', महामहोपाध्यायकृष्णमिश्रस्य 'शुद्धिसर्वस्वम्' इत्येवम्प्रभृतयोऽनेके निबन्धग्रन्थाः विस्तरेण शुद्धि-विषयमाधृत्य गभीरं विचारं प्रकटयन्ति । तेषु शुद्धिविषयकोत्कलीय-

निबन्धग्रन्थेष्वतिमहत्त्वं भजते कालिदासचयनी-विरचिता ``शुद्धि-चन्द्रिका``। ग्रन्थस्यास्य उपलब्धटीकासु पद्यात्मिका 172 अनुष्टुप्श्लोकनिबद्धा शान्तिरथकृता स्फुटचन्द्रिकाभिधा टीका परमप्रसिद्धाऽस्ति।

श्रीजगन्नाथसंस्कृतविश्वविद्यालये स्नातकोत्तरधर्मशास्त्रविभागाध्यक्षपदं साम्प्रतं विभूषयता धर्मशास्त्रविद्याविदग्धेन श्रीमता जयकृष्णमिश्रेण सेयं स्फुटचन्द्रिकान्विता शुद्धिचन्द्रिका टिप्पणी - पाठभेदाद्युल्लेख-पुरस्सरं सम्पाद्य प्राकाश्यं नीयत इति श्रावं श्रावं नितरां प्रमोदमावहति मे चेतः। धर्मशास्त्रे कृतभूरिश्रमाणां मिश्रमहोदयानामेतेन प्रयासेन न केवलं धर्मशास्त्रज्ञाः एव अपितु अनुसन्धातारः, जिज्ञासवः सामान्य- जनाश्च लाभान्विताः भविष्यन्तीति दृढो मे विश्वासः। ग्रन्थरत्नमिदं धर्मशास्त्रवाङ्मयस्य सुषमां सुतरां संवर्द्धयिष्यतीत्यत्र नास्ति संशीतिलेशोऽपि। वयसा युवानोऽपि ज्ञानवृद्धाः डॉ. जयकृष्णमिश्रशर्माणः निजप्रतिभाबलेन नित्यं नूतनविषयानुसन्धानपराः नवनवग्रन्थप्रकाशनपरायणाश्च भवन्तु इति भगवच्चरणारविन्दयोर्विनिवेदयन् तेषां समभ्युदयं दीर्घमायुष्यं च कामये।

इति शम्

वाचस्पतिशर्मा त्रिपाठी

02-09-02

शुभाशंसा

धर्मशास्त्रे विचारितेषु नैकेषु विषयेषु शुद्धिरन्यतमं प्रमुखं स्थानं लभते। शुद्धिमधिकृत्य भारतवर्षेऽस्मिन् वहवो ग्रन्थाः प्रकाशिताः प्रकाश्यन्ते प्रकाशयिष्यन्ते च। देशभेदेन शुद्धिव्यवस्थाया भेददर्शनात् तद्विषयकनिवन्धग्रन्थानां वाहुल्यं स्वाभाविकम्। शुद्धिविषयक-निबन्धकारेषु पञ्चदशशतकीयः प्रसिद्धोत्कलीयधर्मशास्त्रकारः कालिदासचयन्यन्यतमः तत्प्रणीतशुद्धिचन्द्रिकायाः एतादृशी प्रसिद्धिरस्ति यया प्रभाविताः सन्तः तदुपरि नैकाष्टीका व्यरचयन् विपश्चिदपश्चिमाः। तासु टीकासु विद्यावागीशपण्डितकृता विद्यावागीशटीका प्रकाशिता। सम्प्राति विश्वविद्यालयस्यास्य धर्मशास्त्रविभागमुख्यैः डॉ. जयकृष्णमिश्रमहोदयैः तद्ग्रन्थस्य शान्तिरथकृत - स्फुटशुद्धि-चन्द्रिकाटीका सम्पाद्य प्राकाश्यं नीयत इति महतः प्रमोदस्य विषयः। ग्रन्थस्यास्य धनञ्जयविप्रटीका सम्प्रत्यप्यप्रकाशिता वर्त्तते।

यद् भवतु मिश्रमहोदयानामेतादृशः प्रयासः सर्वथा प्रशंसार्ह एव। विभिन्नविश्वविद्यालयेषु धर्मशास्त्राचार्यपाठ्यक्रमे शुद्धिव्यवस्थाया अन्तर्भावात् सर्वेषां धर्मशास्त्रछात्राणां गवेषकाणाञ्च ग्रन्थोऽयं महते कल्याणाय कल्पयिष्यते इत्यत्र नास्ति सन्देहलेशः।

अन्ते एतादृशग्रन्थरत्नसम्पादनेन धर्मशास्त्रभाण्डागारस्य श्रीवृद्धिं कृतवतां डॉ. जयकृष्णमिश्रमहोदयानामुत्तरोत्तरमुन्नतिर्भवत्विति श्रीजगन्नाथस्य चरणारविन्दयोः प्रार्थये। इति शम्।

किशोरचन्द्रमहापात्रः

19-8-02

सांकेतिकी

अग्निपु. - अग्निपुराणम्
कूर्म. उत्त. - कूर्मपुराणम् - उत्तरार्धम्
कृत्य. शुद्धि. - कृत्यकल्पतरुः - शुद्धिकाण्डः
गौ.धर्म. - गौतमधर्मसूत्रम्
दक्ष. स्मृ. - दक्षस्मृतिः
पद्मपु. भूमि. - पद्मपुराणम् - भूमिखण्डः
परा. स्मृ. - पराशरस्मृतिः
पा. गृ. - पारस्करगृह्यसूत्रम्
बौ. धर्म. - बौधायनधर्मसूत्रम्
मनु. - मनुस्मृतिः
मिता.- मिताक्षराटीका
याज्ञ. स्मृ. - याज्ञवल्क्यस्मृतिः
लिङ्गपु. - लिङ्गपुराणम्
व. धर्म. - वसिष्ठधर्मसूत्रम्
वामनपु. - वामनपुराणम्
विष्णुधर्म. - विष्णुधर्मसूत्रम्
वी.मि.शुद्धि. - वीरमित्रोदयः - शुद्धिप्रकाशः
शंख. स्मृ. - शंखस्मृतिः
शु. च. - शुद्धिचन्द्रिका
शु. सा. - शुद्धिसारः
सं. स्मृ. - संवर्त्तस्मृतिः
स्मृतिच. आशौ. - स्मृतिचन्द्रिका - आशौचकाण्डः
स्मृतिमु. - स्मृतिमुक्ताफलम्

☆☆☆

शुद्धिचन्द्रिकायाः

विषयसूची

भूमिका *1-17*

शुद्धिस्वरूपम् 1

शरीरशुद्धेः व्यापकता 2

अतिक्रान्ताशौचम् 4

निर्हाराशौचम् 6

अशौचसन्निपातः 6

सद्यश्शौचम् 8

प्रणेतृपरिचयः 10

मातृकाविवरणम् 13

शुद्धिचन्द्रिकायाः टीकाकाराणां परिचयः 14

शुद्धिचन्द्रिका मूलग्रन्थः *18-50*

शान्तिरथकृतस्फुटशुद्धिचन्द्रिकाटीकासमेतः सुधाटिप्पणीविभूषितश्च

1. मङ्गलाचरणम् 18
2. जननाशौचम् 19
3. मरणाशौचम् 20
4. जननमरणाशौचे कर्मकरणाकरणविचारः 21
5. गुणविशेषेण आशौचव्यवस्था 24
6. रजस्वलाशौचम् 25

7.	गर्भस्त्रावाद्यशौचम्	25
8.	बालाशौचम्	27
9.	कन्याशौचम्	29
10.	क्षत्रविट्शूद्राणामाशौचम्	30
11.	असवर्णपुत्रकन्याशौचम्	32
12.	सन्निपाताशौचम्	34
13.	पञ्चप्रकाराघवृद्धौ व्यवस्था	35
14.	अशौचसङ्करः	36
15.	देशान्तरस्थाशौचम्	38
16.	अतिक्रान्ताशौचम्	39
17.	असपिण्डाशौचम्	40
18.	मरणविशेषाशौचम्	42
19.	अशौचसङ्कोचः	43
20.	एकाहाद्यशौचम्	44
21.	सद्यश्शौचम्	45
22.	निर्हाराद्यशौचम्	47
23.	ग्रन्थप्रयोजनम्	48

परिशिष्टम् *51–64*

शुद्धिचन्द्रिकायाः श्लोकपादानुक्रमणी	51
टीकायाःस्फुटशुद्धिचन्द्रिकायाः	54
श्लोकार्धानुक्रमणी –	
सहायकग्रन्थसूची	62

☆☆☆

भूमिका

शुद्धिर्नामाशौचसंसर्गाभावः[1]। आशौचं च सन्ध्यापञ्च-महायज्ञादिकर्मानधिकारसम्पादकोऽतिशयविशेषः। शुद्धेरशौ-चाभावरूपत्वादाशौचस्य[2] च कर्मानर्हरूपत्वात् कालद्रव्यकर्तृणां कर्मानर्हत्वे शुद्धिः निर्णेया। शौचाभावो ह्याशौचम्। शौचं पुनः पापक्षयो[3] धर्मयोग्यत्वं वा। तत्र पापक्षयः शौचं तदभाव-स्त्वाशौचमिति पर्यवस्यति।

कर्माधिकारः शुद्धिः। तद्विपर्ययश्चाशुद्धिरिति। नन्दपण्डि-तस्तु कर्मानधिकार आशौचमिति स्वरूपं निरस्यति। पुनश्च ''विहितप्रातिस्विकं यावत् कर्मार्हताप्रयोजको धर्मविशेषः शुद्धिस्तद्विलक्षणा चाशुद्धिः'' इत्यपि लक्षणं खण्डयति। मिताक्षराकारस्तु ''कालस्नानापनोद्यपिण्डोदकदानादिविधेर्हेतु-भूतोऽध्ययनादिपर्युदासस्य च निमित्तभूतः पुरुषगतोऽतिशयः कश्चिदाशौचमिति। कर्मानधिकारमात्रं तु तावत्कालम्। आशौच-कर्मानधिकारयोश्च स्पष्टभेदत्वादिति। तस्मात् ज्ञातमेवाशौचं कर्मानधिकारापादकमिति।

शुद्धिप्रकाशकारः[4] विश्वम्भरः कथयति यथा -

अशौचं विहिते कार्येऽनर्हताप्रतिपादकम्।

शुद्धिस्तादृशि कार्ये च योग्यताप्रतिपादिका॥ इति॥

तत्र हारीतमतानुसारं द्विविधमेव शौचं भवति। बाह्यमाभ्यन्तरं च। आभ्यन्तरं भावशुद्धिः। बाह्यमपि त्रिविधम्। कुलशौचमर्थशौचं

1. शु. प्र - पृ - 8/9,
2. शु.सा. श्लो.7,
3. शुद्धिचन्द्रिका - पृ-2,
4. शु.प्र - श्लो.2,

शारीरं च। सूतकमृतकयोर्दशरात्रमुभयतः कुलस्याशौचम्। अर्थशौचं द्रव्यशुद्धिः। शारीरमस्पृश्यस्पर्शनाद्यशौचाभावः।

अपरार्केण[5] शुद्धिविषये उच्यते यथा –

द्रव्यस्य दोषापगमः शुद्धिः। तत्र द्विविधा शुद्धिः। शरीरशुद्धिः, बाह्यद्रव्यशुद्धिश्च। हेमाद्रिरपि[6] – तत्राशुद्धिर्नाम द्रव्यादेः स्पर्शाद्यनर्हतापादको दोषविशेषः। शुद्धिस्तु संस्कारविशेषोत्पादिता तन्निवृत्तिः।

लिंग[7] – पद्म[8] पुराणयोः आभ्यन्तरशुद्धिविषये सूचना प्राप्यते यथा –

''अवगाह्यापि मलिनो ह्यन्तःशौचविवर्जितः।
शैवला झषका मत्स्याः सत्त्वा मत्स्योपजीविनः॥
सदावगाह्य सलिले विशुद्धाः किं द्विजोत्तमाः।
तस्मादाभ्यन्तरं शौचं सदा कार्यं विधानतः।
आत्मज्ञानाम्भसि स्नात्वा सकृदालिप्य भावतः।
सुवैराग्यमृदा शुद्धाः शौचमेव प्रकीर्त्तितम्॥
भावशुद्धिः परं शौचं प्रमाणं सर्वकर्मसु।

मनु[9] रपि मानसिकशुद्धेः सर्वश्रेष्ठतां प्रदर्शितवान्।

इदानीमत्र शारीरशुद्धेः व्यापकताविषये किंचिदुपस्थाप्यते। अशौचं सर्वदा पुरुषगतमेव गृह्यते। यत् कालस्नानाद्यपनोद्यं भवति। तदभ्यन्तरे च वैदिकाध्यापन–अध्ययन–स्मार्त्तकर्मणां च परित्यागः क्रियते। स्मृतिमुक्ता[10]फलानुसारं द्विविधमाशौचं

5. अपरार्कटीका – पृ. 252, 253,
6. श्राद्धकल्प. – पृ. 787,
7. लिंगपु – 8/34 – 36,
8. पद्मपु. – भूमि. 66/86,
9. मनु, 5/106,
10. स्मृतिमु.– पृ. 477,

यथाकर्मानधिकारलक्षणं स्पृश्यत्वलक्षणं च इति। अशौचस्यानेके कल्पा अपि शास्त्रेषु दर्शिताः सन्ति। एकाहकल्प- पक्षिणीकल्प - त्र्यहकल्प - पंचाहकल्प - दशाहकल्प प्रभृतयः उच्चावचशौ- चकल्पाः तत्र दर्शिताः सन्ति। परन्तु तेषां लोके समाचारा- भावान्नातीव व्यवस्थाप्रदर्शनमुपयोगीति नात्र व्यवस्था प्रदर्श्यते। लोके समाचारादनादरणीयमिति केचन। अथवा देशाचारतो व्यवस्था उत गुणवदगुणवद्विषये यथाक्रमं न्यूनाधिककल्पाश्रयेण निर्वाहः। किं वा आपदनापद्भेदेन व्यवस्था। दक्षस्मृतौ सूतके दशपक्षा उक्ताः सन्ति। यथा -

सद्यःशौचं तथैकाहस्त्र्यहचतुरहस्तथा।
षड्दशद्वादशाहाश्च पक्षो मासस्तथैव च॥
मरणान्तं तथा चान्यद् दश पक्षास्तु सूतके॥

दक्षस्मृ. 6/2-3

गर्भग्रहणानन्तरं चतुर्थमासे गर्भपाते स्रावः, पंचमे मासे षष्ठे मासे वा गर्भपाते पातः, सप्तमे मासे ततः परं वा गर्भपाते अपप्रसव इत्युच्यते। गर्भस्रावे मातुः त्रिदिनाशौचं, गर्भपाते च मासानुसारमाशौचं भवति। पुत्रजनने मातुः विंशतिदिवसमाशौचं, कन्याजनने च मासावधि आशौचं भवति। सपिण्डानामन्येषां सर्वेषां दशाहाशौचं भवति। जन्मतः दशदिनाभ्यन्तरे मरणे पित्रोः जननाशौचं भवेत्। दशदिवसानन्तरं च तौ शुध्यतः। तदानीं पिताऽपि अस्पृश्यो भवति। दन्तजननात् पूर्वं शिशोः मरणे सपिण्डाः स्नानेन शुध्यन्ति। पितरौ च पुत्रमरणे दिनत्रयं, कन्यामरणे च दिनमेकं पालयेताम्। दन्तजननात् परं चूडाकरणात् पूर्वं शिशोः मरणे सपिण्डाः अहोरात्रमशौचं पालयेयुः। पितरौ च दिनत्रयं पालयेताम्। चूडाकरणात् परं विवाहात् पूर्वं कन्यामरणे, चूडाकरणात् परमुपनयनात् पूर्वं

पुत्रमरणे पित्राद्याः सपिण्डाः दिनत्रयमशौचं पालयेयुः। समानोदकाश्च स्नानेन शुध्यन्ति। उपनयनात् परं सर्वे सपिण्डाः दशदिवसाशौचं समानोदकाश्च दिनत्रयमशौचं पालयेयुः। शूद्रस्य तु त्रिवर्षानन्तरं विवाहात् पूर्वं मरणे सपिण्डाः दिनत्रयमशौचं पालयेयुः।

विवाहितायाः कन्यायाः पितृगृहमरणे पितृकुले त्रिदिनाशौचं भवति। विवाहिता कन्या यदि भर्तृगृहे पित्रोः मरणं दशदिवसानन्तरं प्रथमवर्षाभ्यन्तरे शृणुयात् तर्हि पक्षिण्यशौचं पालयेत्। भागिनेयगृहे मातुलमरणे त्रिदिनाशौचं, मातुलस्य स्वगृहमरणे भागिनेयस्य पक्षिण्यशौचं भवति। पितामहस्य मरणे विवाहितायाः कन्यायाः स्नानमात्रम्। मातामहस्य मरणे दौहित्र–दौहित्र्योः त्रिदिनाशौचम्। मातामहीमरणे पक्षिण्यशौचम्।

जामातृगृहे श्वश्रु – श्वशुरयोः मरणे त्रिदिनाशौचं, अन्यत्र मरणे पक्षिण्यशौचम्। श्वशुरगृहे जामातृमरणे त्रिदिनाशौचं, अन्यत्र मरणे दिनमेकम्। शालकमरणे जामातुः दिनमेकमशौचम्। मातृबन्धूनां पितृबन्धूनां मरणे पक्षिण्यशौचं भवति। दत्तकपुत्रमरणे जनकपितुः पालकपितुश्च त्रिदिनाशौचम्। सपिण्डानां च दिनमेकम्। दत्तकपुत्रः यदि सपिण्डेषु गृह्यते तर्हि दशदिनाशौचम्। एकग्रामे आचार्यमरणे शिष्यस्य त्रिदिनाशौचं, भिन्नग्राममरणे दिनमेकमशौचम्। आचार्यपत्नी – आचार्यपुत्रमरणयोः शिष्यस्य दिनमेकमशौचम्। ग्रामान्तःस्थे शवे ग्रामवासिनां तावत् कालमशौचं यावत् कालं शवः तिष्ठति।

अतिक्रान्ताशौचम्

यदि कश्चन प्रवासे म्रियते जायते वा तस्य मरणश्रवणे जननश्रवणे वा दशदिवसेभ्योऽवशेषदिनैरेव सपिण्डाः शुद्धयेयुः।

पुत्रः पितुः मातुर्वा मरणश्रवणे तदारभ्य दशदिवसैरेव शुद्धः स्यात् । अस्थिसंचयनात् पूर्वं मरणश्रवणे पंच दिवसावधि अशौचं पालयेत्[11] । वर्षानन्तरं[12] मरणश्रवणे स्नानेन शुध्येत् । वसिष्ठवचनानुसारं दशदिवसानन्तरं त्रिमासमध्ये मरणश्रवणे सपिण्डाः त्रिदिनैरेव शुध्यन्ति । त्रिमासानन्तरं षण्मासाभ्यन्तरे मरणश्रवणे पक्षिण्यशौचं, षण्मासानन्तरं नवमासाभ्यन्तरे मरणश्रवणे दिनमेकं, ततः परं वर्षाभ्यन्तरे श्रवणे च स्नानेन सपिण्डाः शुद्धाः स्युः ।

यदि कश्चन वृद्धावस्थायां प्रवासे तिष्ठति, तस्य समाचारस्तु न प्राप्यते तर्हि तस्य पुत्रपौत्रादिभिः अन्यनिकटसम्बन्धिभिश्च विंशतिसंवत्सरानन्तरं, युवावस्थायां च पंचदशसंवत्सरानन्तरं,ततः न्यूनवर्षवयस्कैः द्वादशवर्षानन्तरं च पर्णनरदाहः क्रियते । पलाशपत्रैः प्रतिकृतिमेकां कृत्वा दाहयित्वा च त्रिदिनाशौचं पालयेयुः ।

साधारणतः अशौचावधिषु, अशौचविधिषु च केचन भेदाः दृश्यन्ते । यथा -

1. जननाशौच - मरणाशौचयोः महान् भेदः दृश्यते ।

2. मरणाशौचेऽपि बहवः भेदाः दृश्यन्ते । यथा -

क. गर्भस्थशिशोः मरणं, (गर्भस्रावः, गर्भपातः, अपप्रसवश्च),

ख. जननानन्तरं मरणं, मरणानन्तरं जननं, दन्तोत्पत्तितः पूर्वं मरणं,

ग. दन्तजननात् परं चूडाकरणात् पूर्वं शिशोः मरणं,

11. स्मृतिमु. - पृ. 534, 12. मनु - 5/76,

घ. चूडाकरणात् परमुपनयनाभ्यन्तरे मरणं,

ङ. उपनयनानन्तरं मरणं,

च. अशौचकालः वर्णानुसारमेव विधीयते।

छ. अशौचावधिः सम्बन्धस्य निवीडतोपरि आधारितो भवति।

ज. मृत्युप्रदेशानुसारं दूरत्वानुसारं च अशौचावधिः निर्णीयते।

शास्त्रेषु निर्हाराशौचविषये उच्यते। यदि कश्चन ब्राह्मणः स्नेहवशात् असपिण्डस्य शवं निर्हरेत्, तर्हि त्रिभिः दिनैरेव शुध्यति। तस्मिन् गृहे तिष्ठति, तदन्नमश्नाति चेत् दशदिवसैरेव शुध्यति। गृहे तस्मिन् न तिष्ठति न वा भोजनं करोति तर्हि दिवसैकेन शुध्यति। लोभवशात् शववहने तत्तद्वर्णविहिताशौचं पालयेत्। मनु – गौतम – याज्ञवल्क्य – पराशरादयः स्मृतिकाराः व्यवस्थापयन्ति यत् ब्राह्मणः अन्यवर्णस्य शवानुगमनं न कुर्यात्। ब्राह्मणः क्षत्रियस्य शवानुगमनं कृत्वा दिनमेकमशौचं कृत्वा पंचगव्यं च पीत्वा शुध्यति। वैश्यस्य तथा दिनद्वयमशौचं षट् प्राणायामान्, शूद्रस्यापि अनुगमनं कृत्वा दिनत्रयमाशौचं, शतं प्राणायामान्, समुद्रगामिन्यां नद्यां स्नानं च कृत्वा शुध्येत्।

ब्राह्मणः असपिण्डस्य गृहे प्रविश्य तस्य सम्बन्धिभिः सह रोदनं कृत्वा दिनमेकमशौचं पालयेत्। शूद्रजातीयशवे तु त्रिदिनाशौचं विधीयते।

आशौचसन्निपातः

कदाचित् अशौचमध्ये अपराशौचसन्निपाते व्यवस्था इदानीं निर्णीयते। गौतममतानुसारमस्यां परिस्थितौ प्रथमाशौचसमाप्तौ एव द्वितीयाशौचस्यापि शुद्धिर्भवति। यदि द्वितीयाशौचं प्रथमाशौचस्यान्तिमरात्रौ आपतति, तदा प्रथमाशौचस्य

समाप्त्यनन्तरं दिनद्वयमतिवाह्य शुध्यति। परन्तु यदि द्वितीयाशौचसन्देशः प्रथमाशौचस्यान्तिमदिवसस्य रात्रौ अन्तिमप्रहरे प्राप्यते तर्हि प्रथमाशौचसमाप्त्यनन्तरं दिनत्रयानन्तरं शुध्यति।[13]

जननाशौचापेक्षया मरणाशौचं गुरुं विद्यात्। यदा आशौचद्वयं समानकोटिकं, द्वितीयाशौचं समानकालिकं, न्यूनकालिकं वा, तर्हि प्रथमाशौचसमाप्तौ द्वितीयाशौचादपि मुच्यते। यदि द्वितीयाशौचमधिककालिकं भवति, तर्हि दीर्घाशौचानुसारेणैव शुद्धिः। अस्मिन् विषये निर्णयसिन्धुकारोक्तं मतमुपस्थाप्यते। यथा –

1. आशौचद्वयं यदि जननसम्बन्धि स्यात्, द्वयं च समानावधिकं, तर्हि प्रथमाशौचसमाप्तौ एव द्वितीयाशौचस्य शुद्धिः।
2. आशौचद्वयं यदि जननसम्बन्धि भवति, परन्तु अनन्तराशौचं दीर्घं, तर्हि द्वितीयाशौचसमाप्तावेव शुध्यति।
3. यदि मरणाशौचद्वयं स्यात्, तयोः द्वितीयाशौचं प्रथमाशौचापेक्षया न्यूनं समानं वा तर्हि प्रथमाशौचेन शुद्धिः।
4. मरणाशौचयोर्मध्ये यदि द्वितीयाशौचं दीर्घाशौचं स्यात् तर्हि द्वितीयाशौचानुसारं शुद्धिः।
5. यदि प्रथमाशौचं जननाशौचं स्यात्, द्वितीयं च शावाशौचं तर्हि मरणाशौचस्याल्पत्वेऽपि मरणाशौचानुसारं शुद्धिः।
6. यदि प्रथमाशौचं मरणोत्पन्नं, अनन्तराशौचं जननमल्पकालीनं स्यात्, तर्हि मरणाशौचानुसारं शुद्धिः।

13. मनु. 5/79, याज्ञ. 3/20, गौ. धर्म. 14/5-6, परा. स्मृ. 3/28, शंख.स्मृ, 15/10,

7. यदि प्रथमाशौचं मरणनिमित्तकं, द्वितीयं च दीर्घकालीनं जनननिमित्तकं, तर्हि आशौचद्वयं स्वस्वावध्यनुसारं शुध्येत् ।

यदि कस्यचित् पुरुषस्य मातृमरणानन्तरं पितृमरणं भवेत्, तर्हि पितृमरणाशौचानुसारमेव शुद्धिः । यदि पितृमरणानन्तरं मातृमरणं भवेत् तर्हि पितृमरणाशौचं व्यतीत्य मातृमरणनिमित्तकं पक्षिण्यशौचमतिवाहयेत् ।[14]

सद्यश्शौचम्

दक्षोक्त[15] दशविधाशौचेषु सद्यःशौचमेकाहाशौचं चान्तर्भवतः । एकाहाशौचमित्युक्ते सम्पूर्णमहोरात्रमेव ज्ञायते । सद्यःशौचमित्युक्ते[16] स्नानसमाप्तिपर्यन्तं अथवा दिवाभागसमाप्तिपर्यन्तं, रात्रिसमाप्तिपर्यन्तं वा ज्ञायते ।

आशौचनियमाः पंचसु अवधिषु एव प्रयुज्यन्ते । यथा –

1. केचन पुरुषाः अशौचात् सर्वथा मुक्ताः भवन्ति ।
2. केषांचन अस्पृश्यानां कृते अशौचं न पाल्यते ।
3. अशौचिपुरुषेभ्यः अपि कियन्ति द्रव्याणि ग्रहीतुं शक्यन्ते ।
4. आत्मघातिनां मरणे आशौचं न पाल्यते ।
5. केषांचन पुरुषाणामाशौचपालनस्यावश्यकता नानुभूयते ।

याज्ञवल्क्यमतानुसारं यज्ञार्थं वृतः, पुरोहितः, गृहीतमधुपर्कः इति एते सर्वे सद्यःशौचार्हाः भवन्ति । ब्रह्मचारि – राजा –राजपुरुष – कारुशिल्पि – ब्रह्मज्ञ – श्रोत्रिय – वानप्रस्थ – संन्यासि – वैद्य – नापित – सत्रपूत – सव्रत – चित्रकार –

14. मिता. (याज्ञ. 3 – 20), 15. दक्षस्मृ. – 6/2,
16. याज्ञ. स्मृ. 6/23,

दास - दासी - आहिताग्नि - सूपकारादीनां सद्यःशौचं कीर्त्तितम्। मिताक्षरानुसारं[17] त्रयाणामाश्रमिणां ब्रह्मचारि - वानप्रस्थ - यतीनां सर्वत्र शुद्धिः, विशेषप्रमाणाभावात्।

प्रायोऽग्नि - विषोदकोद्बन्धनप्रपतनैः मृतानामात्मघातिनां पतितानां च नाशौचम्[18]। गोब्राह्मणहतानां, चाण्डाल - सर्प - वैद्युत् - दंष्ट्रिभ्यः पशुभ्यश्च मृतानां डिम्बाहवहतानां च सद्यश्शौचम्।

आशौचविषये देशाचारस्य मर्यादा नावमन्तव्या। देशधर्मः सर्वथा रक्षणीयः। विष्णु[19] धर्मसूत्रानुसारं ग्रामान्तःस्थः शवश्चेत् तर्हि शवनिष्कासनं यावद् ग्रामवासिनामाशौचम्। केशकर्त्तनपूर्वकं श्वेतसर्षपादिभिः अभ्यंगं कृत्वा स्नात्वा वस्त्रपरिवर्त्तनं कृत्वा गृहं प्रविशेत्। ततः शान्तिकर्म कृत्वा ब्राह्मणपूजनं कुर्यात्[20]। शुद्धिकौमुद्यां त्रयाणां वेदानां कृत्यमिदं विस्तरशः वर्णितमस्ति। सम्पूर्णस्नानानन्तरं गोविन्दनामस्मरणपूर्वकं ब्राह्मणैः जलं मार्जयित्वा स्वस्तिवाचनं कारयेत्। सामवेदानुयायिनः शान्तिवाचनस्थाने वामदेवगानं कुर्युः। यजुर्वेदानुयायिनः ऋग्वेदानुयायिनश्च गायत्रीमन्त्रेण साकं शान्तिसूक्तं पठित्वा सुवर्णवैतरणीगो-शय्यादानादिकं कुर्युः।

धर्मशास्त्रकाराः अशौचस्यावधिमधिकं कर्त्तुं नाभिलषन्ति। प्रायः स्थलेषु अशौचस्य संकोचं विकल्पव्यवस्थां वा उपस्थापयन्ति। सर्वे च शावाशौचस्य गुरुत्वं प्रतिपादयन्ति। जननाशौचस्य महत्त्वं तथा न स्वीकुर्वन्ति।

17. मिता (याज्ञ. स्मृ. 3 - 28)

18. हारलता - पृ. 113, अग्निपु. 137 - 32, वामनपु. 14/99-100,

19. विष्णु. धर्म. - 19/18-19, 20. विष्णुधर्म. - 19/18 - 19.

मरणाशौचविषये सामान्यतः नियमचतुष्टयं पर्याप्तं मन्यते। यथा -

1. पुत्रस्य मरणे पिता माता च, पितुः मरणे मातुः मरणे वा पुत्रः दशदिवसमशौचं पालयेत्।
2. पत्युः मरणे पत्नी, पत्न्याः मरणे पतिः, शवदाहकश्च दशदिवसमशौचं पालयेत्।
3. मृतस्य परिवारे संलग्नाः ये पुनः तिष्ठन्ति, ते सर्वे दिनत्रयमशौचं पालयेयुः।
4. सर्वे सम्बन्धिनः सपिण्डाश्च मरणात् परं संवत्सराभ्यन्तरे सन्देशश्रवणे सद्यश्शौचं पालयेयुः।
5. वर्षोपरान्तं मृत्युवार्त्ताश्रवणे सपिण्डाः सद्यश्शौचं कुर्युः।

रजस्वला दिनत्रयानन्तरं शुद्धा भवति। चतुर्थेऽह्नि पत्युः पादसंवाहनादौ, पञ्चमेऽहनि दैवपित्र्यकर्मसु शुद्धा भवति। पञ्चमेऽहनि यदि रजः स्रवति तथापि अशुद्धा भवेत्। सूर्योदयात् पूर्वं यदि रजस्वला भवति, रात्रौ वा तर्हि पूर्वमेव दिनं ग्राह्यम्।

प्रणेतृपरिचयः

महामहोपाध्यायः कालिदासचयनिमहाभागः शुद्धिचन्द्रिका-ग्रन्थं विरचितवान्। असौ महाभागः पद्यात्मकेऽस्मिन् लघुधर्म-निबन्धग्रन्थे न कुत्रापि स्ववंशजातिगोत्रादीनां विवरणमुप-स्थापितवान्। यद् भवतु निश्चितमिदं यदयं महानुभवः कालिदासः उत्कलप्रदेशे ब्राह्मणकुले च अजायत। सनातनधर्मे प्रचलितायाः शुद्धिव्यवस्थायारुपस्थापकत्वात्, उत्कलेषु तल्लिखितपुस्तकस्य सुलभत्वात् तथा ग्रन्थे सन्निविष्टानां शुद्धीनामुत्कले प्रचलित-त्वादुत्कलीय एव स आसीत्। पुनश्चान्यप्रदेशीयाः न कुत्रापि

एतेषां मतमुद्धरन्ति । अपरपक्षे उत्कलीयधर्मनिबन्धकाराः सर्वे वारंवारमस्य मतग्रहणपूर्वकमुद्धरन्तीति कृत्वा अस्योत्कलीयत्वं स्फुटमेव । शुद्धिविषयस्योपदेष्टृरूपेण तथा चयनी-इत्युपनाम्नः धारकत्वादेष जात्या ब्राह्मण इत्यपि स्पष्टीभवति ।

उत्कलीयधर्मनिबन्धकारेषु शुद्धिविषयमुपजीव्य कालिदास-चयनिमहाभागः सर्वप्रथममेव ग्रन्थं प्रणीतवान् । अतोऽस्य प्रामाण्यं सिद्धान्तांश्च परवर्तिकालीनाः उत्कलीयधर्मनिबन्धकाराः गृहीतवन्तः । अतोऽयं शुद्धिचन्द्रिकाग्रन्थः उत्कलीयधर्मनिबन्ध-सम्प्रदायं ऋद्धिमच्चकार । षोडशशताब्दीतः अष्टादशशतकमध्ये समुद्भूताः दिव्यसिंह - कृष्णमिश्र - नरसिंहवाजपेयी - गदाधरप्रभृतयः स्वेषु स्वेषु ग्रन्थेषूत्कलीयस्मार्त्तानां सम्मानार्थं तथा स्वग्रन्थगौरववर्धनार्थमस्य मतमुद्धरन्ति ।

शुद्धिचन्द्रिकायाः मतं नित्याचारप्रदीपे प्रथमभागे एकवारं, दिव्यसिंहमहापात्रकृत - श्राद्धदीपे वारत्रयं, (1. अशौचे कर्मकरणाकरणविचारे, 2. सन्निपाताशौचविषये, 3. पित्राद्यशौ-चविषये च), गदाधरराजगुरुकृत - कालसारे पञ्चवारं (1. अशौचे कर्मकरणाकरणविषये, 2. सूतिकाशौचविषये, 3. पित्राद्यशौचविषये, 4. साग्निकस्यास्थिचयनविषये, 5. सद्यःशौचविषये च), गोपीनाथवाजपेयिकृत - पण्डितसर्वस्वे त्रयोदशवारं (1. अनुगमरोदनार्द्रास्थिस्पर्शविषये, 2-3. क्रियाकर्त्तृविचारे, 4-5. अशौचे त्याज्यात्याज्यविचारे, 6-7. इतिकर्त्तव्यताविषये, 8. समकाल - समानजातीयाशौचविषये, 9. सूतकमृतकयोर्योगविषये, 10. ऋत्वाद्यशौचादिनिर्णयविषये, 11. बालाशौचविषये, 12. कन्यामरणे पित्रशौचविषये, 13. पर्णनरदाहव्यवस्थाविषये च), कृष्णमिश्रकृत - शुद्धिसर्वस्वे दशवारं (1. साग्निनिरग्निशुद्धिविचारे, 2. पित्रोरशौचविषये,

3. बालमरणाशौचविचारे, 4-5. बालाद्यशौचविषये, 6-7, एकजातीयाशौचद्वयविचारे, 8. असपिण्डानामशौचविचारे, 9. पर्णनरदाहविचारे, 10. अशौचे वपनविचारे च) ससम्मानमुद्धृतं दृश्यते।

बहुभिः लेखकैरुत्कलीय इति निर्णीतत्वात् उत्कलीयैर्वाचीननिबन्धृभिः स्मृतत्वात्, उत्कलीयसमाचारस्योपस्थापकत्वात्, अनुत्कलीयनिबन्धृभिरस्मृतत्वात् तथा प्रदेशान्तरेऽस्य ग्रन्थस्य प्रतिलिपेरदर्शनात्, उत्कलेष्वेव प्रतिलिपीनामुपलब्धत्वादयं शुद्धिचन्द्रिकाकारः कालिदासः उत्कलीय आसीदिति नास्ति संशयलेशः। न केवलमुत्कलप्रान्तीयः, अपि तु पुरीसमीपवर्त्तिनि वीरबलभद्रपुरग्रामनिवासी चासौ आसीदिति ऐतिहासिकाः प्रतिपादयन्ति।

कालिदासचयनिमहाभागः पञ्चदशशतकस्यान्तिमार्द्धे एवावर्त्तत। अयं शुद्धिचन्द्रिकाग्रन्थः परवर्त्तिषु बहुषु धर्मनिबन्धग्रन्थेषु उद्धृतोऽस्ति। तेषां कालपर्यालोचनया तेभ्यः पूर्ववर्ती असौ आसीदिति तर्कयितुं शक्यते।

(1) शुद्धिचन्द्रिकायाः मतं नरसिंहवाजपेयिना सर्वप्रथमं गृहीतम्। तस्य च कालः 1520-1580 खीष्टाब्दमध्ये निश्चीयते।

(2) श्राद्धदीपकारः दिव्यसिंहमहापात्रमहोदयः 1640-1680 खीष्टाब्दमध्ये अवर्त्तत इति ऐतिहासिकैः निर्णीयते।

(3) शुद्धिसर्वस्वकारः कृष्णमिश्रः 1800-1850 खीष्टाब्दमध्ये एवासीदिति ऐतिहासिकानां मतम्।

(4) कालसारकारः गदाधरराजगुरुमहोदयः भोईवंशीय-गजपतेः हरेकृष्णदेवस्य राजत्वकाले (1710-1730 A.D) एवावर्त्तत ।

एभ्यः प्रमाणेभ्यः सिद्धान्तयितुं शक्यते यदसौ कालिदास-चयनिमहाभागः 1450 तः 1500 ख्रीष्टाब्दाभ्यन्तरे एवाजायत इति ।

मातृकाविवरणम्

अस्य ग्रन्थस्य सम्पादनार्थं मया आदर्शग्रन्थरूपेण तिस्रः मातृका अवलम्बिताः । तासां संक्षिप्तविवरणमधः प्रदीयते ।

1. उत्कलराज्यसंग्रहालय, भुवनेश्वरस्थस्य - डि. एच्/48 (ए) - शुद्धिचन्द्रिका - कालिदासचयनिविरचिता - शान्तिरथकृता - स्फुटशुद्धिचन्द्रिकाटीकासमेता ।

2. तत्रैव - डि. एच्/435 (वि.) शुद्धिचान्द्रिका कालिदासचयनिविरचिता -शान्तिरथवृ्ता - स्फुटशुद्धिचन्द्रिकाटीकासमेता ।

3. मत्संगृहीततालपत्रमातृकासु - शुद्धिचन्द्रिका - कालिदासचयनिविरचिता - शान्तिरथवृ्ता - स्फुटशुद्धिचन्द्रिकाटीकासमेता ।

1. शुद्धिचान्द्रिका - कालिदासचयनी - शान्तिरथटीकासमेता - (मत्संगृहीत-तालपत्रमातृका - नं 11)

तालपत्रात्मिका । तालपत्रसंख्या - 24 । तालपत्रमानं- 22 से, मि. x 4.2 से,मि. लिपिः - ओडिआ । प्रतिलिपिलेखनकालः 1837 ए.डि. । सम्पूर्णा । अवस्था-

उत्तमा। प्राप्तिस्थानम् – गोवर्द्धनत्रिपाठी, हरचण्डीसाहि, रणपुरगडसकाशात् क्रीतेयं प्रतिलिपिः।

2. शुद्धिचन्द्रिका – कालिदासचयनी – डि.एच्. /48 ए. – शान्तिरथटीकासमेता

तालपत्रात्मिका। तालपत्रसंख्या – 10 तः 17 पर्यन्तं विद्यते। प्रथमतः नवमपर्यन्तं पत्रं विनष्टम्। लिपिः ओडिआ। प्रतिलिपिः – ऊनविंशशतकम्। असम्पूर्णा। अवस्था – सुस्था। प्राप्तिस्थानम् – गडमाणत्री, वेगुनिआ, पुरी।

3. शुद्धिचन्द्रिका – कालिदासचयनी – डि. एच्/435 वि – शान्तिरथटीकासमेता

तालपत्रात्मिका। तालपत्रसंख्या – 15, तालपत्रमानं – 28 से.मि. x 3.6 से.मि। लिपिः – ओडिआ। प्रतिलिपिलेखनकालः – ख्रीष्टीयोनविंशशतकम्। असम्पूर्णा। अवस्था – उत्तमा। प्राप्तिस्थानम् – गडमाणत्री, वेगुनिआ, पुरी।

शुद्धिचन्द्रिकायाः टीकाकाराणां परिचयः

शुद्धिचन्द्रिकायाः समादरं लक्षीकृत्य तदुपरि व्याख्याग्रन्थान् विरचयितुं बहवः विद्वांसः प्रयत्नं कृतवन्तः। तेषु प्रमुखाः भवन्ति यथा –

1. शुद्धिचन्द्रिकायाः – स्फुटशुद्धिचन्द्रिकाटीका – शान्तिरथकृता।

2. शुद्धिचन्द्रिकायाः – विद्यावागीशटीका – विद्यावागीश-पण्डितकृता।

3. शुद्धिचन्द्रिकायाः - धनञ्जयविप्रटीका।

1. शुद्धिचन्द्रिकायाः स्फुटशुद्धिचन्द्रिकाटीकाकार शान्तिरथः -

अयं महानुभवः शुद्धिचन्द्रिकायाः स्फुटशुद्धिचन्द्रिकाटीकां विरचितवान्। अयं ग्रन्थः गजपतिरामचन्द्रदेवस्य 24 तमे अङ्के अर्थात् 1837 खीष्टाब्दे प्रतिलिपीकृतः इति ग्रन्थान्ते लिखितमस्ति। टीकेयमेकसप्तत्युत्तैरकशतसंख्यकैरनुष्टुप्श्लोकैः परिपूर्णतामेति। ग्रन्थस्यान्तिमे स्वयं शान्तिरथः नृणां हिताय ग्रन्थस्याभिप्रायं व्यक्तीकर्तुं ममायं प्रयास इति स्पष्टीकरोति।

2. शुद्धिचन्द्रिकायाः विद्यावागीशटीकाकारः- पण्डितविद्यावागीशः

असौ च विद्यावागीशमहाभागः एकाम्रवासिनः लिङ्गराजस्य प्रीतये ग्रन्थमिमं व्यरचयदिति प्रतिपादयति। अस्मादनुमीयते यत् सोऽपि भुवनेश्वरनिवासी तत्समीपवर्त्ती वा आसीत्। स च वीरकेशरीनृपस्य राजत्वकाले अर्थात् 1736 - 1793 खीष्टाब्दमध्ये टीकां कृतवान् इति समाप्तिसूचकवाक्यात् ज्ञायते। अस्याः टीकायाः पञ्च प्रतिलिपयः उत्कलराज्यसंग्रहालये संरक्षिताः सन्ति।

3. शुद्धिचन्द्रिकायाः धनञ्जयविप्रटीका

शुद्धिचन्द्रिकायाः धनञ्जयविप्राख्यः कश्चन टीकाकारः आसीत्। अस्याः टीकायाः प्रतिलिपित्रयमुत्कलराज्यसंग्रहालये सुरक्षितमस्ति। तस्याः टीकायाः मङ्गलाचरणं यथा -

श्रीगणेशाय नमः। अविघ्नमस्तु।
ओं नमः श्रीगणेशाय तस्मै विघ्नविनाशिने।
यत् पादाभ्यर्चनाद् देवाः प्राप्नुवन्ति मनीषिताम्॥

विप्रो धनञ्जयो नाम स्मृतिमार्गानुसारिणीम् ।
करोत्येव सम्यग् शुद्धिचन्द्रिकापदयोजनाम् ।। इति ।।

एतदतिरिक्तमस्य ग्रन्थस्य अनेके पद्यानुवादाः गद्यानुवादाश्चोत्कलप्रान्ते दरीदृश्यन्ते । अनेकेऽनुवादाः इदानीमपि अप्रकाशिताः सन्ति । पुस्तकमिदं सामान्योत्कलानुवादसहितमुत्कलप्रान्ते बहुत्र प्रकाशितं विद्यते । शुद्धिचन्द्रिकायाः समाजे बहुलप्रचलनमेव परमं कारणमिति अनुमीयते ।

उत्कलीयशुद्धिसम्बन्धिषु ग्रन्थेषु शुद्धिचन्द्रिका प्रथमा तथा कालिदासचयनिमहाभागोऽपि प्रथमाचार्यः । अतः परवर्त्तिनः प्रायशः सर्वे शुद्धिविषयकनिबन्धकाराः कालिदासस्य शुद्धिचन्द्रिकां प्रामाणिकग्रन्थरूपेण स्वीकुर्वन्ति । पञ्चविंशतिश्लोकनिबद्धोऽयं लघुग्रन्थः नानाविधानाशौचविषयानातनोति ।

अत्र स्मृतिकारैः प्रतिपादितानि बहूनि प्रमाणवचनानि आकलय्य साररूपेण समग्राणि शुद्धितत्त्वानि बोधयितुं समर्थो भवत्यसौ कालिदासमहाभागः । एतेन ग्रन्थरत्नेन आकृष्टाः सन्तः परवर्त्तिनः उत्कलीयधर्मनिबन्धकाराः अस्याः शुद्धिचन्द्रिकाया आदर्शेन अनुप्राणिताः भवन्ति । लघुकायोऽयं ग्रन्थः उत्कलीयधर्मनिबन्धकाराणां मार्गदर्शकरूपेण विराजतेतराम् । शुद्धिचन्द्रिकायाः मतानि भूयो भूयः स्वस्वग्रन्थेषु उट्टंक्य स्वग्रन्थमर्यादां वर्द्धयन्ति उत्कलीयधर्मनिबन्धकाराः । कतिपयेषु स्थलेष्वसौ कालिदासः अन्येषां निबन्धकाराणां मतसमालोचनपूर्वकं स्वमतमुत्कलीयसमाचारं चोपस्थाप्य आत्मनः गौरवं शतगुणितान् करोति । अतोऽस्य ग्रन्थकारस्य कालिदासस्यावदानमतुलनीयमद्वितीयं च वर्त्तते ।

महर्षिमुखप्रसूतानां तत्तत्स्मृतिवचनानाममृतशीकरैः परिपुष्टोऽयं ग्रन्थः । येषां महर्षीणां ज्ञानलवं सम्प्राप्य निबन्धकाराः

अपि स्वजीवनं धन्यं कर्त्तुं निबन्धग्रन्थान् प्रणीतवन्तः। तेभ्यः महर्षिभ्यः धर्मनिबन्धकारेभ्यश्च मम प्रणामाञ्जलिरवसरेऽस्मिन् निवेद्यते।

ग्रन्थेऽस्मिन् केषाञ्चन महानुभावानां शुभाशंसा मया स्वीकृताऽस्ति। यया शुभाशंसया ग्रन्थोऽयं गौरवमण्डितो भवति। ते च महोदयाः भवन्ति कामेश्वरसिंहसंस्कृतविश्वविद्यालयः, दरभंगा, विहारस्य स्नातकोत्तरधर्मशास्त्रविभागस्याचार्याः प्रो. डा. वाचस्पतिशर्मत्रिपाठिमहोदयाः तथा श्रीजगन्नाथ-संस्कृतविश्वविद्यालयस्य स्नातकोत्तरपरिषदः अध्यक्षाः प्रो.डा. किशोरचन्द्रमहापात्रमहोदयाश्च। एतदर्थं तेभ्यः महोदयेभ्यः भक्तिपूर्णप्रणामाञ्जलिः समर्प्यते।

ग्रन्थस्यास्य मुद्रणकर्मणि सहायताप्रदानार्थं पुरीस्थ - रमाप्रेस - स्वत्वाधिकारिणः श्रीयुक्तललाटेन्दुमहान्तिमहोदयाः तथा अक्षरसज्जार्थं निर्माणपरिपाटिनिमित्तं च कुमारी सस्मिता राजगुरु सर्वथा धन्यवादार्हाः भवन्ति।

गुरुकृपालब्धं ज्ञानकणं निरवच्छिन्नादृष्टाशीर्वादं च सम्प्राप्य कर्मण्यस्मिन् प्रवृत्तोऽस्मि। अवसरेऽस्मिन् दिवंगतानां तेषां गुरुचरणानां पण्डितश्रीकुलमणिमिश्रपादानां चरणकमलयोः ग्रन्थरत्नमिदं समर्प्य तोषमनुभवामि। जगदीश्वरस्य परमेश्वरस्य कृपाकटाक्षलब्धं ज्ञानं मयि सततं प्रवहतु इति संप्रार्थ्य विरमामि।

विनीतः

जयकृष्णमिश्रः

कालिदासचयनिप्रणीता
शुद्धिचन्द्रिका

मन्वादिशास्त्रामृतसञ्चयालयः
श्रीकालिदासाभिधधी[क]रश्चन्द्रमाः ।
तेने शु[ख]द्धिसिन्धुवि[ग]वर्द्धनाय च
ध्वान्तान्धलोके क्षणशुद्धिचन्द्रिकाम्[1] ।। 1 ।।

श्रीशान्तिरथप्रणीता स्फुटशुद्धिचन्द्रिकाटीका

श्रीगणेशाय नमः । अविघ्नमस्तु ।

विघ्नराजं प्रणम्यादौ भाविविघ्नविनाशनम् ।
करोति वै शान्तिरथस्तां स्फुटशुद्धिचन्द्रिकाम् ।।1 ।। 1 ।।

टिप्पणी - सुधा

1. शुद्धिचन्द्रिकायाः मङ्गलाचरणे धर्मशास्त्रस्यादिपुरुषत्वेन नमस्कृतः सर्वजनवन्द्यः महर्षिः मनुः आदौ स्मर्यते। मन्वतिरिक्ता अन्ये सर्वे धर्मशास्त्रकारा अपि आदिपदेन गृह्यन्ते। शुद्धिचन्द्रिकाग्रन्थप्रणयनात् पूर्वं यद्यपि अनेकानि शुद्धिविषयकाणि ग्रन्थरत्नानि आसन् तथापि तेषां ग्रन्थजातानां विषयाणामव्यवस्थिततत्वात् बहुव्यापकत्वात् अल्पीयसैः वचनैः व्यवस्थापयितुमुपक्रमते ग्रन्थकारः श्रीमान् कालिदासचयनिमहाभागः ।

पाठान्तरम् –क) ''सुधी'' इति ख पु. पाठः ।
ख) ''सुधा'' इति ख पु. पाठः ।
ग) ''विवर्द्धयशौचकं'' इति ख पु. पाठः ।

विप्र-क्षत्रिययोः[2] सपिण्डजनने[3] शुद्धिर्दशद्वादशा -
होरात्रैरथ पक्षकोपरि विशः शूद्रस्य मासात् परम् ।
पुत्रीमज्जनतोऽथ[4] सर्वजननीस्पर्शे दशाहाच्छुचिः
कर्मार्हा द्वादशाहतः पुरुषसूर्मासात्परं स्त्रीप्रसूः[5] ॥ 2 ॥

सूतके ब्राह्मणो शुद्धो दशाहानन्तरं भवेत् ।
द्वादशाहात् क्षत्रः शुचिः भवत्येव न संशयः ॥ 2 ॥
पञ्चदशाहैस्तु वैश्यः शूद्रो मासात्तु शुद्ध्यति ।
पुत्रीमज्जनतः शुद्धाः स्त्रियः पुंसप्रसूः पुनः ॥ 3 ॥
दशाहानन्तरं स्पर्शे शुद्धो भवति निश्चितम् ।
कर्मणो चैकादशाहे भवेत् शूद्रप्रसूः पुनः ॥ 4 ॥
मासात् परं च ये मोहाद्दैवे पित्र्ये च योगीनि ।
विज्ञेयं मृतकाशौचं न विशेषो हि वर्त्तते ॥ 5 ॥ 2 ॥

शान्तिरथमहोदयः शुद्धिचन्द्रिकायां स्फुटशुद्धिचन्द्रिकाख्यां टीकां विरचयन् ग्रन्थगतं निखिलं गूढतत्त्वनाविष्करोति । स्वकृतप्रयासस्य निर्विघ्नपरिसमाप्त्यर्थं टीकाकारः आदौ विघ्नराजं प्रणमति ।

2. जननमरणाशौचावधिमाहतुः मनुयाज्ञवल्क्यौ -
शुद्ध्येद् विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥ मनु. 5-83
क्षत्रस्य द्वादशाहानि विशः पञ्चदशैव तु ।
त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिनः ॥ याज्ञ. 3-22

गौतमोऽपि - शावमाशौचं दशरात्रमनृत्विग्दीक्षितब्रह्मचारिणां सपिण्डानाम् । एकादशरात्रं क्षत्रियस्य । द्वादशरात्रं वैश्यस्य । अर्द्धमासमेके । मासं शूद्रस्य । (गौ. ध. 2-5-1/5) ।

3. सपिण्डजनने - सपिण्डमध्ये जननाशौचे जाते ।

तद्वत् सर्वसपिण्डीनां च कुलजे शुद्धिर्मृतेऽथाचतुः[6]
पञ्च'सप्तदशाहिकास्थिचयनात् खण्डे तृतीयांशके ।
अङ्गाशौचमथो मृताहगणना साग्नेस्तु दाहात् परं
सर्वे वा दशरात्रतोऽपि शुचयस्तच्छंकराः शूद्रवत् ।। 3 ।।

आचतुर्थदिनं विप्रः क्षत्रियः पञ्च वासरान् ।
वैश्यः सप्तदिनं तस्य शूद्रस्य दशवासरान् ।। 6 ।।
अङ्गाशौचे प्रवृत्ते तु तेषां तत्रास्थिसञ्चयः ।
खण्डाशौचे तृतीयांशमभिव्याप्य तु शुद्धताम् ।। 7 ।।
ततोऽङ्गस्पर्शे न दोषो नास्तीति मुनयो विदुः ।
कालादक्रमोढ़े दैवात् साग्निकस्य द्विजस्य तु ।। 8 ।।
मृताहगणना दाहदिवसादेव जायते ।
मासिकं वार्षिकं श्राद्धं मृताहे तु प्रवर्त्तते ।। 9 ।।
निरग्नेरपि विप्रस्य मृताहाद् गणना भवेत् ।
अथ वासविवन्नाश्च दशाहात् शुद्धतां गताः ।। 10 ।।
सर्वे सङ्करजाताश्च शूद्राशौचे व्यवस्थिता ।
अशौचद्वितये सन्ध्यापञ्चमहायज्ञादिकं पुनः ।। 11 ।। 3 ।।

---

4. पुत्रीमज्जनत इत्यस्मिन् विषये सुमन्तुवचनं यथा – (शु.च विद्यावागीशटीकायां पृ. 4)

सूतके सूतिकावर्जं संस्पर्शस्तु न दुष्यति ।
संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते ।।
सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः ।
कृत्वा सचेलस्नानं तु शुद्धो भवति तत्क्षणात् ।।

शु.च (विद्यावागीशटीका पृ. 4)

संक्त्तोऽपि –

जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते ।
माता शुध्येद दशाहेन स्नानात्तु स्पर्शनं पितुः ।। (सं.स्मृ.श्लो.42)

सन्ध्या पञ्चमहामखादिविहितं[8] स्मार्त्तं च कर्म त्रिधा
त्याज्यं पैत्र्यमपि द्विधाऽप्यशुचिता प्रेताम्बुपिण्डं विना।
श्राद्धे[9] मासिक-वार्षिके तु निखिलं कुर्यात्तदन्ते पुन -
र्नाशौच्यन्नमृते सगोत्रमितरैः भोज्यं समा तद्भुजः ।। 4 ।।

नित्यं नैमित्तिकं काम्यं सर्वं कर्म परित्यजेत् ।
प्रेतोद्दिष्टं दशाहान्तं कर्मजालं विहाय च ।। 12 ।।
पित्रीयं निखिलं कर्म परित्यज्य न संशयः ।
मासिकं वार्षिकं चैव कुर्यात् शुद्धादिने पुनः ।। 13 ।।
अशौचिनामन्नं जलं स्वज्ञातिव्यतिरेकतः ।
इतरे चैव भुञ्जाना जायन्ते तत्समा पुनः ।। 14 ।। 4 ।।

---

5. *सूतिकायाः अशौचविषये पैठीनसिः -*
सूतिकां पुत्रवतीं विंशतिरात्रेण स्नातां सर्वकर्माणि कारयेत् ।
मासेन स्त्रीजननीम् । इति ।

6. *अस्थिसञ्चयनकालः संवर्त्तेन (श्लो. 38 - 39) यथा -*
चतुर्थेऽहनि कर्त्तव्यमस्थिसञ्चयनं बुधैः ।
ततः सञ्चयनादूर्ध्वमङ्गस्पर्शो विधीयते ।।

पैठीनसिरपि -
चतुर्थेऽहनि कर्त्तव्यः संस्पर्शो ब्राह्मणस्य तु ।
पञ्चमेऽहनि संस्पर्शो विज्ञेयः क्षत्रियस्य तु ।।
सप्तमेऽहनि वैश्यस्य शूद्रस्य दशमेऽहनि ।। (कृत्य-शुद्धि, पृ - 14)

तेन विप्रादीनां चतुर्थपञ्चमसप्तमदशमादिनभवास्थि-चयनपर्यन्तमङ्गाशौचम् । तदूर्ध्वमङ्गस्पर्शो न दुष्यति इति विद्यावागीशः (शु.च. पृ - 6) ।

7. *अशौचदिवसगणनाविषये अङ्गिराः -*
अनग्निमत उत्क्रान्तेः साग्नेः संस्कारकर्मणः ।
शुद्धिः सञ्चयनं दाहान्मृताहस्तु यथातिथि ।। मिता (याज्ञ. 3-20)

नाडीछेदनतः पुरा [क]च वितरेद् गोहेमवस्त्रादिकं
कुर्याज्जातककर्म[10] षष्ठदिवसाद्युक्तं च तस्मिंच्छुचिः ।
स्मार्त्ताग्नावकृतादिना[11] जनिमृतेऽप्यन्येन वा हावयेत्
त्रेताकर्म तु सर्वमेव कुलजैरन्यैश्च कुर्यात् स्वयम् ।। 5 ।।

कुमारप्रसवे नाड्याश्छेदनात् प्राग् गवादिकं ।
वितरेत् स्वर्णवस्त्राद्यं जातपुत्रो महाजनः ।। 15 ।।
जातकर्मादिकं सर्वं कुर्वन् षष्ठदिनादिगम् ।
अशुद्धो जायते नैव यदाहुर्मुनिसंशयाः ।। 16 ।।
अशौचे च स्मार्त्तवह्नौ पक्वान्नव्यतिरेकतः ।
अकृतेन व्रीहियवादीनां होमं च कारयेत् ।।17 ।।

अनाहिताग्नेर्मरणदिवसप्रभृति, आहिताग्नेः संस्कारदिवसप्रभृति चाशौचं कर्त्तव्यम् । सञ्चयनं तूभयोः संस्कारदिवसप्रभृतीति विवेचनीयम् । मिता. (याज्ञ.3- 20)

8. *अशौचे कर्मकरणाकरणविषये मनुः -*

उभयत्र दशाहानि कुलस्यान्नं न भुज्यते ।
दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्त्तते ।। पराशरमाधवीये (3-8)

जाबालिः -

सन्ध्यां पञ्चमहायज्ञान् नैत्यकं स्मृतिकर्म च ।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया ।। (कृत्य. शुद्धि. पृ. 22)

यमशङ्खौ -

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्त्तते ।।

प्रेतोद्देश्येन उदकपिण्डदानमस्थिसञ्चयनादिकं च यावद्दशाहविहितं तत्कर्त्तव्यमिति विद्यावागीशः । (शु. च. पृ - 9)

क) 'प्रवितरेद' इति ख. पु. पाठः ।

स्फु. शु.

सायं प्रातः होममात्रं तत्र वैकल्पिकं स्मृतम् ।
अन्यत् सर्वं त्यक्तमेव श्रौते भेदे च वर्त्तते ।। 18 ।।
सपिण्डपितृयज्ञादि होमं दर्शादिसम्भवम् ।
अन्येन कुलजेनापि कुर्यादेव न संशयः ।।19 ।।
अन्यथा श्रौतकर्मैव विनाशं याति निश्चितम् ।। 5 ।।

---

9. श्राद्धेऽशौचपाते व्यवस्था प्रतिपादिता ऋष्यश्रृङ्गेन –

देये पितृणां श्राद्धे तु अशौचं जायते यदि ।
अशौचे च व्यतीते वै तेषां श्राद्धं प्रदीयते ।।
शुचिभूतेन कर्तव्यं या तिथिः प्रतिपद्यते ।
सा तिथिस्तस्य कर्तव्या न त्वन्या वै कदाचन ।। (हारलता पृ – 27)

10. पुत्रजन्मनि जातकर्म – दानादिषु अशौचं नास्तीति स्मृतिकाराः प्रतिपादयन्ति । यथा शंखलिखितौ – ''कुमारप्रसवे नाड्यामच्छिन्नायां गुडतिलहिरण्यवस्त्र-प्रावरणगोधान्यप्रति- ग्रहेष्वदोषः ।'' कृत्य . शुद्धि (पृ – 22)

हारीतः– जाते चैव कुमारे पितृणामामोदात् पुण्यं तदहः । तस्मात्तिलपूर्णपात्राणि सहिरण्यानि ब्राह्मणानाहूय पितृभ्यः स्वधां कुर्यात् । प्रजापतये च प्राङ्नाड्याश्छेदात् संस्कारान् पुण्यार्थान् पुरुषस्य कुर्वन्ति । नाड्यां तु च्छिन्नायामाशौचम् । (कृत्य, शुद्धि, पृ – 21)

पारस्करः – जातस्य कुमारस्य अछिन्नायां नाड्यां मेधाजननायुष्ये करोति । (पा. गृ. 1-16-3)

11. अशौचे श्रौतस्मार्त्तकर्मणामनुष्ठानविषये जाबालिः –

जन्महानौ वितानस्य कर्मत्यागो न विद्यते ।
शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः ।।

स्मृतिच. (आशौ. पृ – 77)

छन्दोगपरिशिष्टे कात्यायनः–

सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते ।
होमः श्रौते तु कर्त्तव्यः शुष्कान्नेनाथवा फलैः ।। (3/60-63)

एकाहाद् बहुवह्निवेदनिरतः संपर्कहीनः शुचि -
स्त्रेताग्निर्यदि मन्त्रवित् त्रिदिवसैः स्मार्त्ता तथा वेदवित्।
सद्वेदोऽपि निरग्निकश्चतुरहात् स्मार्त्ता समन्त्रोऽप्यथा–
नग्निमन्त्रयुतस्य पञ्चदिवसैः पूर्णे तु संपर्किणः[12] ॥ 6 ॥

श्रौताग्नियुक्तः संपूर्णः शाखाध्यायी यदा द्विजः ॥ 20 ॥
दारादिसङ्गहीनश्चेत् स एकाहेन शुध्यति।
अधीतमन्त्रमात्रश्च युक्तः श्रौताग्निना पुनः ॥ 21 ॥
[क]असंपृक्तश्च यो विप्रः स त्र्यहाच्छुद्धिमृच्छति।
स्मार्त्ताग्नियुक्तः संपूर्णः शाखाध्यायी [ख]त्रिभिस्तदा ॥ 22 ॥
पूर्णवेदोऽग्निरहितश्चतुर्भिः दिवसैः शुचिः।
स्मार्त्ताग्निमांश्च त्रीन् मासान् मात्राच्चतुरहाच्छुचिः ॥ 23 ॥
अधीतमन्त्रमात्रत्वाद्रहितश्चोभयाग्निना।
असंपृक्तो यदा विप्रः स पञ्चदिवसैः शुचिः ॥ 24 ॥
[ग]उक्ता एते च सर्वेऽपि संपृक्ताः स्युः यदा पुनः।
यस्तु संस्कारहीनश्च संपूर्णाऽशौचिनोऽखिलाः ॥25 ॥ 6 ॥

---

12. *आशौचसङ्कोचविषये दक्षः -*
सद्यःशौचं तथैकाहस्त्र्यहश्चतुरहस्तथा।
षड्दशद्वादशाहाश्च पक्षो मासस्तथैव च ॥
मरणान्तं तथा चान्यद्दश पक्षास्तु सूतके।
एकाहाच्छुद्ध्यते विप्रो योऽग्निवेदसमन्वितः ॥
हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा।
त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैः ॥ (6/2-3, 5-6)

क) ``असंपृक्तश्च सगोत्रस्तदा शुद्धिमवाप्नुयात्`` इति ख. पु. पाठः।

ख) ``स्तथा`` इति ख. पु. पाठः।

ग) ``उक्ता एतेन सर्वेषां`` इति ख. पु. पाठः।

सर्वा मासयुगादृतौ त्रिदिवसैः स्त्री शुध्यति स्नानत -
स्तुर्ये स्पर्शशुचिः स्वधर्मविधिकृत् सा पञ्चमे निस्रवा[13] ।
षण्मासादथ माससंख्यकदिनैः स्रावेऽत्र सद्योऽपरः
सोर्ध्वं जातमृतौ तथा मृतजनौ सूतेरशौचं चरेत्[14]॥ 7 ॥

सर्ववर्णस्य या योषित् सा चेदृतुमती भवेत् ।
मासयुज्यमभिव्याप्य पुत्री दिनेन शुध्यति ॥ 26 ॥
चतुर्थदिवसे स्पर्शमात्रे शुद्धा च जायते ।
पञ्चमे स्रावरहिता धर्मकर्मार्हतां व्रजेत् ॥ 27 ॥
तृतीयमासात् षण्मासपर्यन्तं गर्भघातने ।
माससंख्यादिनेनैव स्नाता शुध्यति निश्चितम् ॥ 28 ॥
अपरो ज्ञातिवर्गश्च सद्यश्शुद्धो न संशयः ।
सप्तमाष्टममासादौ यदि स्यात् प्रसवो पुनः ॥ 29 ॥
संपूर्णं सूतकाशौचं कुर्यात्तत्र न संशयः ।
जातस्य मरणे वाऽपि मृतस्य जननं तथा ॥ 30 ॥ 7 ॥

---

13. रजस्वलायाः शुद्धिविषये वसिष्ठोऽपि (5-6)

''त्रिरात्रं रजस्वलाऽशुचिर्भवति ।''

चतुर्थदिवसे रजस्वला स्नाता सती स्पर्शविषये शुचिर्भवति । तत्र चतुर्थदिवसे स्पृश्यापि धर्माधिकारिणी पञ्चमदिवस एव भवति, निःस्रवा चेत् । इति विद्यावागीशः । शु. च. (पृ. 16) ।

शंखस्मृतौ - शुद्धा भर्तुश्चतुर्थेऽह्नि न शुद्धा दैवपित्र्ययोः ।
दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति ॥

(शं. स्मृ. 16-17)

विज्ञानेश्वरोऽपि - यदा रजोदर्शनादारभ्य पुनः सप्तदशदिनाभ्यन्तरे रजोदर्शनं तदा अशुचित्वं नास्त्येव । अष्टादशे त्वेकाहाच्छुद्धिः एकोनविंशे द्व्यहात्, तत उत्तरेषु त्र्यहाच्छुद्धिः । मिता. (याज्ञ. 3-20)

तत्सप्ताष्टममासयोरुभयथा गर्भच्युतौ[15] सद्गुणे
ज्ञातौ वा* विगुणे यथेष्टचरिते सद्योऽहरेकं त्र्यहम् ।
त्रीण्येवात्र पितुः परं मृतजनौ[16] सर्वस्य पूर्णं भवे -
दन्तः सूतिमृते पितुश्च जननाशौचद्वयं नान्यतः ।। 8 ।।

सप्तमे चाष्टमे मासे यदि दैवात् प्रसूयते ।
जाते मृतौ मृतजनौ सद्गुणज्ञातिसंशये ।। 31 ।।
सद्यःशौचं विधेयं च निर्गुणानां पुनस्तथा ।
एकाहात् शुचिता ज्ञेया यथेष्टचरिता पुनः ।। 32 ।।

---

14. स्रावाशौचविषये यथा जावालः -

रात्रयो मासतुल्याः स्युर्जनन्या गर्भविस्रवे । कृत्य. शुद्धि. (पृ-45)

सुमन्तुरपि - गर्भमासतुल्या दिवसा गर्भस्रावे । सद्यः शौचं वा ।

कृत्य, शुद्धि (पृ.45)

तृतीयमासादि षण्मासपर्यन्तं कालमभिव्याप्य यावत्संख्यमासे स्रावो भवति तावत् संख्याहोरात्रैः एव स्नाता सती स्त्री शुद्ध्यति । तृतीयचतुर्थमासगर्भस्रावे पितुः स्नानमात्रमेव । सपिण्डश्च सद्यः शुध्यति, इति विद्यावागीशः (शु, च, पृ. 18)

तत ऊर्ध्वमपप्रसवे च व्यवस्थोक्ता ब्राह्मे -

षण्मासाभ्यन्तरं यावद्गर्भस्रावो भवेद्यदि ।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ।।
अत ऊर्ध्वं स्वजात्युक्तमशौचं तासु विद्यते ।
सद्यः शौचं सपिण्डानां गर्भस्य पतने सति ।
स्त्रीणां तु पतितो गर्भः सद्यो जातो मृतोऽथवा ।।

वी.मि. शुद्धि. (पृ.21)

15. गर्भच्युतिविषये अशौचं व्यवस्थितं हारीतस्मृतौ -

गर्भपतने त्रिरात्रं स्त्रीणां साधीयो रजोविशेषत्वात् ।
जातमृते मृतजाते वा कुलस्य त्रिरात्रम् ।। कृत्य. शुद्धि. (पृ-44)
सुमन्तुः - गर्भमासतुल्या दिवसा गर्भस्रावे । सद्यःशौचं वा ।

पित्रोः प्राग्रदनादहर्व्रतविधेर्बाले मृते च त्र्यहं[17]
ज्ञातेश्चाद्विजचौलकोपनयनात्[18] सद्यो निशा त्रिक्षपाः ।
ऊर्ध्वं पूर्णमधो रदादिषु च तत्कालेऽप्यशौचं समं
खाते नाद्विसमे जलादिदहने क्षेपे च कृते त्र्यहः ॥ 9 ॥

ज्ञातयस्त्रिदिनाच्छुद्धा त्रिदिनैश्च पिता शुचिः ।
पुनर्नवमासादौ च मृतस्य जनने तथा ॥ 33 ॥
मातुः सर्वसपिण्डानां पूर्णाशौचं च कीर्त्यते ।
दशरात्रादिमध्ये च जातस्य मरणे पुनः ॥ 34 ॥
पितृमात्रोश्च संपूर्णाशौचं ज्ञेयं मनीषिभिः ।
अन्यस्मिन् ज्ञातिवृन्दे च नाशौचद्वयमिष्यते ॥ 35 ॥
जामले च मृते जातमेके [ख]जातं मृते गता ।
पित्रोस्तु दशरात्रं स्यात् सद्यश्शौचं सपिण्डनम् ॥ 36 ॥

16. *बृद्धहारीतः – जातमृते मृतजाते वा सपिण्डानां दशाहम् ।*
शु. सा, भा 2/पृ–34.

सप्तमाष्टममासयोः गर्भपतने लघुहारीतः –
जातमृते मृतजाते वा कुलस्य त्रिरात्रम् । शु. सा. 2/पृ–34

17. *बालमरणे पारस्करः (3/10/2,4,5)*
अद्विवर्षे प्रेते पित्रोराशौचम् । एकरात्रं त्रिरात्रं वा । शरीरमदग्ध्वा निखनन्ति ।

कूर्मपुराणेऽपि – *अजातदन्तमरणे पित्रोरेकाहमिष्यते ।*
जातदन्ते त्रिरात्रं स्याद्यदि स्यातां तु निर्गुणौ ॥
ऊर्ध्वं दशाहादेकाहं सोदरो यदि निर्गुणः ।
अथोद्ध्वं दन्तजननात् सपिण्डानामशौचकम् ॥
अदन्तजातमरणं सम्भवेद्यदि सत्तमाः ।
एकरात्रं सपिण्डानां यदि तेऽत्यन्तनिर्गुणाः ॥
शु. सा. 2/पृ.37

पाठाः – क) द्विगुणे इति ख.पु.पाठः ।
ख) जातमृतिर्गता इति ख. पु. पाठः ।

स्फु.शु.

अदन्तात् प्राक् बालमृतौ मातापित्रोश्च केवलम् ।
अहोरात्रेण शुद्धिः स्यात् पूर्वं गर्भाष्टमात् पुनः ॥ 37 ॥
मासयुग्मादि षड्वर्षमध्ये बालमृतिर्यदा ।
तदा पितुश्च मातुश्च त्रिदिनैः शुद्धिरिष्यते ॥ 38 ॥
दन्तात् प्राक् बालमरणे सद्यः ज्ञातिश्शुचिर्भवेत् ।
पूर्वं त्रिवर्षात् मृत्युश्चेदहोरात्राच्छुचिस्तथा ॥ 39 ॥
चूडाकालाद् व्रतात्तर्हि बालकस्य मृतिर्यदा ।
तथा ज्ञातिसमूहश्च त्रिरात्राच्छुद्धिमृच्छति ॥ 40 ॥
गर्भाष्टमातीतकालेऽनुपनीते सूते मृते ।
पूर्णाशौचं स्वजात्युक्तं मुनिभिस्तत्र कीर्त्यते ॥ 41 ॥
उपनीतस्य मरणे पूर्णाशौचं स्वभावतः ।
दन्तचूडोपनायेषु षण्मासादेरधस्तथा ॥ 42 ॥
जायमानेषु मृत्युश्चेत् स्वस्वाशौचं विधीयते ।
सांवत्सरिकबालस्य चूडाकरणमिष्यते ॥ 43 ॥
शाखान्तरे च पञ्चाब्द बालकस्योपनायने ।
तत्तत् क्रियोपपन्नेति स्वस्वाशौचं विधीयते ॥ 44 ॥ 8 ॥
रदाद्युत्पत्तिकालेऽपि यदि न स्याद्रदादिकम् ।
षण्मासादौ तदा काले मृत्यौ स्वाशौचमीरितम् ॥ 45 ॥
द्विवर्षोनस्य बालस्य शरीरप्रोतने तथा ।
नोदकं नैव पिण्डोऽस्ति प्रागुक्ताशौचदर्शनम् ॥ 46 ॥

---

18. चूडाकालात् पूर्वं शिशुमरणे याज्ञवल्क्यः - (3-23)
आदन्तजन्मनः सद्य आचूडानैशिकी स्मृता ।
त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ॥
द्विमासाधिकषड्वर्षमध्ये बालबालामृतौ गर्भाष्टमाब्दादि-कालात् पूर्वं त्रिरात्रम्, षड्वर्षत्रिमासादिकाले अनुपनीतमृतौ तु सम्पूर्णमेव स्वजात्युक्ताशौचम् । इति विद्यावागीशः (शु. च. पृ-24)

आदन्ताद्दुहितुर्मृतावहरतः पित्रोस्तदोर्द्ध्वं त्र्यहं[19]
भ्रातुश्चारदनात् क्षुरात् परिणयात् स्नानं तथाहस्त्र्यहं ।
सद्यो ज्ञातिषु चाक्षुरादुपरि चावाग्दानमेका निशा
वागदानोपयमान्तरोभयकुले तिस्रो न पित्र्ये परम् ।। 10 ।।

अद्विवर्षशरीरस्य दाहे क्षेपे पुनस्त्र्यहम् ।
दाहकार्ये जलं दद्यादिति प्राहुः पुराविदः ।। 47 ।।
पश्चाब्दादौ प्रत्ता पूर्वे दिने चैवोदकक्रिया ।
ऊर्द्ध्वमस्नातकप्रेते क्रियाः पूर्वविधानतः ।। 48 ।। 9 ।।

---

19. कन्याशौचाधिकारे याज्ञवल्क्यः - (3-24)
अहस्त्वदत्तकन्यासु बालेषु च विशोधनम् ।।

अङ्गिराः - *अविशेषेण वर्णानामर्वाक् संस्कारकर्मणः ।*
त्रिरात्रेण भवेच्छुद्धिः कन्यास्वह्ना विधीयते ।।

मिता. याज्ञ 3-24

स्मृत्यन्तरेऽपि- *अप्रत्तासु च प्रत्तासु संस्कृतासंस्कृतास्वपि ।*
मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधि ।।

शु. सा. भा. 2/ पृ - 38

कूर्मपुराणे - *अजातदन्तमरणे पित्रोरेकाहमुच्यते ।*
आदन्तात् सोदरे सद्य आ चूडादेकरात्रकं ।
आप्रदानात् त्रिरात्रं स्यादिति शास्त्रविनिश्चयः ।।

कूर्म. उत्त. 23-11, 12

मनुः (5-72) स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुद्ध्यन्ति बान्धवाः ।।

ब्रह्मपुराणेऽपि- *बाक् दाने तु कृते तत्र ज्ञेयं चोभयतस्त्र्यहम् ।*
पितुर्वरस्य च ततो दत्तानां भर्तुरेव च ।
स्वजात्युक्तमशौचं स्यात् सूतके मृतके तथा ।।

शु. सा. भा 2/पृ.39

द्वैजं द्वित्रिगुणं मतं नृपविशोस्तद्बालबालामृतौ[20]
गर्भाष्टादिषु[21] पूर्णमग्रजविधिः शेषेऽथ शूद्रस्य तु।
दन्ताधस्त्र्यहमत्रिवर्षमरणे पञ्चोपरि द्वादश -
थोढाऽनूढमृतौ तु षोडशपरं पूर्णे विवाहेऽप्यधः ॥ 11 ॥

पूर्वं च दशनोत्पत्तेः दुहितुः मरणं यदा।
मातापित्रोस्तदैकाहमशौचं परिकीर्त्तितम् ॥ 49 ॥
षण्मासोपरि काले च विवाहात् पूर्वमेव च।
विवाहोपरि वृद्धत्वपर्यन्तं त्र्यहमेव तु ॥ 50 ॥
भ्रातुश्च रदनोत्पत्तिपर्यन्तं सद्यः शुध्यति।
त्रिवर्षात् प्राक् यदा मृत्युरेकरात्रं प्रकीर्त्तितम् ॥ 51 ॥
चूडाकालात् विवाहान्तं कन्याया मरणे तथा।
भ्रातुस्त्रिरात्रं शुद्धिः स्याद् भगिन्याश्च तथैव च ॥ 52 ॥
संप्लुतायाः सोदरायाः ज्ञातिवर्गस्य चोच्यते।
द्विवर्षमध्ये बालायाः मृत्यौ ज्ञातिषु शुद्धता ॥ 53 ॥
सद्यो भवति तस्माच्च परतो बालिकामृतौ।
वाग्दानकर्मपर्यन्तमेकाहोरात्रमेव च ॥ 54 ॥
[क]वाक्दानाच्च विवाहस्य मध्ये कन्यामृतिर्यदा।
तदा पितृकुले भर्त्तुस्त्र्यहाशौचं च कीर्त्त्यते ॥ 55 ॥

---

20. *क्षत्रियविट्शूद्राणां बालबालामृतौ अशौचप्रकारमाह अङ्गिराः -*

विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी।
द्व्यहेन क्षत्रिये शुद्धिस्त्रिभिर्वैश्ये मृते तथा ॥

(हारलता पृ.47)

विप्रस्य बालबालामृतौ यदशौचमुक्तं तत्सर्वं यथासंख्यं क्षत्रियस्य बालबालामृतौ द्विगुणम्। एवमेव वैश्यस्य बालबालामृतौ त्रिगुणं मन्तव्यम् इति विद्यावागीशः। (शु. च. पृ - 28)

पाठाः - क) ''वाग्दानस्य' इति ख.पु.पाठः।

स्फु.शु.

मातुर्भ्रातुर्वीरस्यापि त्रिदिनाशौचमिष्यते ।
विवाहानन्तरं कन्यामरणेन पितुः कुले ।। 56 ।।
पित्रोश्च केवलं प्रोक्तं त्र्यहमेव तु विष्णुना ।। 10 ।।
बालस्य बालिकायाश्च मृते विप्रस्य कीर्त्तितम् ।। 57 ।।
यदशौचं यथासंख्यं क्षत्रिये द्विगुणं च तत् ।
वैश्ये च त्रिगुणो ज्ञेयो ब्राह्मणस्योदितो विधिः ।। 58 ।।
[क]गर्भाष्टमादि काले च क्षत्रियस्य विशस्तथा ।
संपूर्णाशौचमुदितं ब्राह्मणोक्तप्रकारतः ।। 59 ।।
[ख]अन्यत्राशौचविषये न विशेषः प्रवर्त्तते ।
ब्राह्मणोक्तो विधिश्चैव क्षत्रिये चापि वैश्यके ।। 60 ।।
दन्तोत्पत्तेः पूर्वमेव बालबालामृतौ तथा ।
त्रिवर्षोनस्य मरणे पञ्चाहोरात्रमिष्यते ।। 61 ।।
ततश्चाषोडशाब्दान्तमविवाहितशूद्रकः ।
त्र्यहत्वे च द्वादशाहमशौचं तत्र कीर्त्यते ।। 62 ।।
षोडशाब्दानन्तरं च शूद्रस्य मरणे ततः ।
संपूर्णाशौचमुदितं विवाहे तदविपर्यये ।। 63 ।।

---

21. गर्भाष्टादिषु विप्रवत् क्षत्रियवैश्यानामपि कालः निर्द्दिष्टः ब्रह्मपुराणे –

अनुपनीतो विप्रस्तु राजा चैवाधनुर्धरः ।
अगृहीतप्रतोदस्तु वैश्यः शूद्रस्त्ववस्त्रधृक् ।।
म्रियते यत्र तत्र स्यादशौचं त्र्यहमेव च ।
द्विजन्मनामयं कालस्त्रयाणां च षडाब्दिकः ।
पञ्चाब्दिकस्तु शूद्राणां स्वजात्युक्तमतः परम् ।। (शु. सा. पृ – 37)

पाठा. क) ''गर्भाष्टमेऽब्दे'' इति ख.पु.पाठः ।
ख) बालकबालिकामृतव्यतिरिक्तविषये ।

विप्रादेरसवर्णपुत्रवनिता शौचे[22] क्रमोद्वाहिनः
षट्त्र्येकाहमशौचमक्रमविधौ तत्सप्तपञ्चत्र्यहम् ।
तेषां चैकपदे च दासभृतकाऽन्तेवासिनां वासिनां
स्वाम्युक्तं यदि जीवति प्रभुरिदं नोचेत् सवर्णोदितम् ।। 12 ।।

षोडशाब्दात् पूर्वमेव विवाहश्रद्धया यदा ।
तदा शूद्रस्य मरणे मासाशौचं प्रकीर्त्तितम् ।। 64 ।। 11 ।।
विप्रस्य क्षत्रकन्यायां यदि पुत्रः प्रजायते ।
तदा षड्दिवसाशौचं वैश्यापुत्रे त्र्यहं पुनः ।। 65 ।।
यदा शूद्रस्य कन्यायां पुत्रो विप्रस्य जायते ।
एकाहेन तदा शुद्धो ब्राह्मणो नात्र संशयः ।। 66 ।।
क्षत्रस्य वैश्यकन्यायां संततिः जायते यदा ।
षड्दिनेन तदा शुद्धिः शूद्रीपुत्रो त्र्यहं तथा ।। 67 ।।
वैश्यस्य शूद्रकन्यायां पुत्रे जाते च षड्दिनम् ।
क्रमः प्रोक्तो विधिरयमग्रिमेऽथ प्रकीर्त्तितः ।। 68 ।।
प्राग् वैश्यां परिणीयाऽथ क्षत्रियां च ततः परम् ।
विप्रः शूद्रां परिणयेत् तदा तत्पुत्रसम्भवे ।। 69 ।।

---

22. असवर्णपुत्रपत्न्यादिजनिताशौचे दक्षः –
चतुर्णामानुलोम्येन स्त्रीणामेको यदा पतिः ।
दशाहषट्त्र्यहैकाहैः प्रसवे सूतकं भवेत् ।। (6–12)

विष्णुः – ब्राह्मणस्य क्षत्रियवैश्यशूद्रेषु सपिण्डेषु षड्रात्रत्रिरात्राहोरात्रैः । क्षत्रियस्य वैश्यशूद्रयोः षड्रात्रत्रिरात्राभ्याम् । वैश्यस्य शूद्रेषु षड्रात्रेण ।
(वि. धर्मसू. 22/22–24)

बृहस्पतिः – दासान्तेवासिभृतकाः शिष्याश्चैकत्र वासिनः ।
स्वामितुल्येन शौचेन शुद्ध्यन्ति मृतसूतके ।।
(कृत्य. शुद्धि. पृ – 28)

पुत्राणामसवर्णिनां च जननी जन्म द्विधा शौचिनां[23]
ताते जीवति चाविभक्तधनके पैत्र्यं न चेन्मातृकम् ।
हीनानां च परोक्तमेव सुहृदां वर्णोत्तमाशौचिनां
स्वाशौचं किल हीनबान्धवजनाशौचे च वर्णोत्तमे ॥ 13 ॥

क्षत्रियायां च सप्ताहं वैश्यायां पञ्चवासरान् ।
शूद्रायां सूतकाशौचं त्रिदिनाशौचमेव च ॥ 70 ॥
दासानां भृत्यशिष्यानामसवर्णकयोषिताम् ।
स्वामिनो ज्ञातिजाशौचं कीर्त्तितं मुनिपुङ्गवैः ॥ 71 ॥
यदा दासादयः सर्वे स्वामीस्थाने कृतास्पदाः ।
स्वामी जीवति चेत् तेषामशौचं स्वामिजातकम् ॥ 72 ॥
स्वामिनि जीवति यदा स्वजातिविहितं तथा ॥ 12 ॥
पुत्राणामसवर्णानामविभक्तधनः पिता ॥ 73 ॥
यदि जीवति तेषां च जनन्याः सूतके मृतौ ।
पितृजातीयविहितमशौचं वदतिर्यदा ॥ 74 ॥
न जीवति यदा तातः स्याद्विभक्तधनोऽथवा ।
मातृजातीयविहितमशौचं तु तदा भवेत् ॥ 75 ॥

---

23. *असवर्णस्त्रीजनितपुत्राणां स्वमातृजनितसूतकमृतकाशौचे आपस्तम्बः -*

क्षत्रविद्शूद्रजातीनां येऽपि स्युर्मृतसूतके ।
तेषां तु पैतृकं शौचं विभक्तानां तु मातृकम् ॥

(हारलता पृ - 59)

कूर्मपुराणेऽपि - *क्षत्रविद्शूद्रदायादा ये स्युर्विप्रस्य बान्धवाः ।*
तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते ॥
राजन्यवैश्यावप्येवं हीनवर्णासु योनिषु ।
स्वमेव शौचं कुर्यातां विशुद्ध्यर्थं न संशयः ॥

(कूर्म. उत्त. 23/39-40)

सूतौ सूतिरथ मृतौ यदि मृतिर्न्यूना समा त्वेतरा –
होरात्रेषु पतेत्तदा तु शुचिता पूर्वाघशेषैर्दिनैः[24] ।
अन्त्याहेऽथ यदाऽथवा तदुषसि द्वाभ्यां त्रिभिश्चाधिके –
र्योगो यावदयं द्वयोश्च कुलजस्तावज्जनाङ्गाशुचिः ।। 14 ।।

उत्कृष्टवर्णजनिताशौचे निपतिते पुनः ।
मृतिसूत्योः बहुत्वेऽपि शोधकं स्यात्तदोत्तरे ।। 76 ।।
भर्त्तुश्च मरणे कार्या ईदृक्शौचविचारणा ।
विद्यया यज्ञकर्माद्यैः विशिष्टो यः सपिण्डकः ।। 77 ।।
सहोदरान्तरंगत्वात् भवत्येके तेषां तु तद् ।
हीनवर्णा भवत्येके तेषां तु तदशौचकम् ।। 78 ।।
हीनवर्णसपिण्डानां सूतके मृतके तथा ।
उत्कृष्टः वत्सानां शुद्धाः स्वाशौचं कुर्युरेव तत् ।। 79 ।। 13 ।।
सूतकान्तर्यदा सूतिर्मृतकान्तर्यदा मृतिः ।
न्यूनं चेत् पूर्वसाम्येऽपि पूर्वमेव तु शौचकम् ।। 80 ।।

---

24. समानजातीयाशौचसन्निपाते याज्ञवल्क्यः –
अन्तरा जन्ममरणे शेषाहोभिर्विशुद्ध्यति । (3-20)

विष्णुः – जननाशौचमध्ये यद्यपरं जननं स्यात्, *पूर्वाशौचव्यपगमे शुद्धिः । रात्रिशेषे द्वाभ्यां प्रभाते दिनत्रयेण । आशौचमध्ये ज्ञातिमरणेऽप्येवमेव । (22/35-37)*

मनुः – अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् । (5-73)

उशनाः – स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद् यदि ।
न च पूर्वेण शुद्धिः स्यात् स्वकालेनैव शुद्ध्यति ।।
(शु. सा. भा. – 2/पृ. 44)

शङ्खलिखितौ – अथ चेदन्तरा प्रमीयेत जायेत वा अवशिष्टैरेव दिवसैः शुध्येदहःशेषे द्वाभ्यां, प्रभाते त्रिभिः । (शु. सा 2/43)

आशौचे द्विविधोऽन्तरङ्गगुणवद्भावः प्रयुक्तं पुन -
द्वैधाऽशौचमघोत्तरं यदि पुराऽशौचाहपूर्वार्द्धके[25] ।
यावद्यावदभूत्तदेव सकलं पूर्वेण शोध्यं तदा
स्यादर्धे यदि चोत्तरे गुरुतरं पूर्वस्य तच्छोधकम् ।। 15 ।।

अहोरात्रं प्रेतगतं त्यक्त्वा पूर्वदिनैः पुनः ।
ज्ञातयः शौचमायान्ति विशिष्टेऽन्त्यदिने यदा ।। 81 ।।
अन्त्याहस्योषसि पुनरशौचद्वयसङ्गमे ।
अन्त्याहे द्विदिनाधिक्यं ततश्च त्रिदिनाधिकम् ।। 82 ।।
अशौचं तदुषः काले मुनिभिः परिकीर्त्तितम् ।
अशौचयोर्द्वयोर्योगे कुले यावत् प्रजायते ।। 83 ।।
अङ्गाशौचं तावदेवेत्यादियोगे विशेषतः ।। 14 ।।
सूतके मृतके वापि पूर्वपश्चाहमध्यतः ।। 84 ।।

---

25. *प्रथमाशौचस्य पूर्वार्द्धे उत्तरार्द्धे वाऽशौचान्तरसन्निपाते व्यवस्थोक्ता शुद्धिसारे गदाधरेण - दशमेऽहनि तदुषसि च सजातीय-निमित्ताशौचश्रवणे द्वित्रिदिनवृद्धया शुद्धिर्यद्यपि स्मृतिषु विहिता । तथापि ''न वर्द्धयेदघाहानि'' इति मनुना (5-84) निषिद्धा । तथा च विहितप्रतिषेधाद् विकल्पः । तदुक्तं भट्टैः -*

अथवान्तर्यदाशौचनिमित्तं किञ्चिदापतेत् ।
तच्छेषेण विशुद्धिः स्यात्तच्छेषोऽयं भविष्यति ।।
न वर्द्धयेदघाहानि निमित्तापगतान्यपि ।।

विकल्पे सति यथादेशाचारं व्यवस्था । इत्यस्मद्देशे दशमाह-तत्प्रभातप्रयुक्त - द्वित्रिदिनवृद्धिर्नाद्रियते । तथा देवलः-

परतः परतः शुद्धिरघवृद्धौ विधीयते ।
स्याच्चेत् पञ्चतमादह्नः पूर्वेणाप्यनुशिष्यते ।। इति

(शु. सा भा. 2/ पृ. 43)

सर्वाशौचविशोधकं गुरुतमं पित्रोरशौचं ध्रुवं
पूर्वं वा परतोऽथ चैवमनयोर्मातुः पिता शोधकः[26] ।
दीर्घाऽल्पापि[27] पुरा पराऽपि सततं सूतेर्मृतिः शोधिका
द्वैधं दीर्घमपि स्वमल्पसदृशो हित्वाऽग्निदं सूतिकाम् ।। 16 ।।

पुनः सहोदरो भ्राता पितृव्यो वाऽथ पैतृकः ।
जायते श्रूयते वा चेत् तदा पूर्वं हि शोधकम् ।। 85 ।।
पूर्वोक्तानां मृतिः सूतिरुत्तरार्द्धे यदा पतेत् ।
पूर्वपश्चाहमध्ये तु तस्य चेत् मृतसूतके ।। 86 ।।
तदा पूर्वं सूतकं हि मृतकं शोधकं भवेत् ।
पूर्वाहमध्ये बाहुल्ये पूर्वमेव तु शोधकम् ।। 87 ।।
यदोत्तरार्द्धे पश्चाहे गुणयुक्तः सपिण्डकः ।
सूयते म्रियते वाऽपि स एव किल शोधकः ।। 88 ।।
उत्तरार्द्धे सूतकादि बाहुल्यं यदि जायते ।
तदाघवृद्ध्या निर्णीतमुत्तरं चैव शोधकम् ।। 89 ।। 15 ।।

---

26. पित्राद्यशौचविषये पैठीनसिः –
पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः ।
श्रुत्वा तद्दिनमारभ्य दशाहं मृतकी भवेत् ।। (शु. सा 2/45)

स्मृत्यन्तरे – मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता ।
पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीम् ।।
(शु. सा. 2/47)

अत्र गदाधरराजगुरुः शुद्धिचन्द्रिकायाः प्रमाणवचनमुत्थाप्य प्रतिपादयति यथा एतदन्येऽप्यस्मद्देशीया निबन्धकृतः संमेनिरे । अत्र यत् केचित् –

पूर्वं वा परतोऽथ चैवमनयोर्मातुः पिता शोधकः ।। (शु. च. श्लो. 16)

इति कारिकां निबध्य पितृवियोगमध्ये यत्र कुत्रापि दिने मातृवियोगे चोभयथापि पितृवियोगदिनमारभ्य दशाहोरात्रैः शुद्धिः । (शु. सा. 2/47)

स्फु.शु.

अशौचस्यापि पूर्वार्द्धे उत्तरार्द्धेऽपि चेत् पतेत् ।
मातापित्रोश्च मरणं तदा पूर्वं न शोधकम् ।। 90 ।।
पितुर्मातुर्मृतिदिनमारभ्य दशरात्रकम् ।
पुत्रो भवत्यशौची च सन्देहो नात्र वर्त्तते ।। 91 ।।
मातुर्मृतकमध्ये च पिता चेन्म्रियते पुनः ।
पितुर्मृतिदिनादेव पुत्रोऽशौची भवेद् यदा ।। 92 ।।
एकात्मकत्वात् पुत्रस्य पिता तत्र महान् यतः ।
ततः पितुः शोधकत्वं न मातुर्मुनिभिः स्मृतम् (93)
मृतिश्चेदल्पकालिन्यप्यथवा दीर्घकालिनी ।
सूतेः प्रजाताऽपि सूतेरुत्तरगाऽपि वा पुनः ।। 94 ।।
पूर्वार्द्धे चोत्तरार्द्धेऽपि यदा पतति योगतः ।
तथापि शोधकात् सूतेर्मृतिरेव न संशयः ।। 95 ।।
त्रिदिनाशौचजननं मृतकं यदि जायते ।
दशाहात् सूत्यशौचस्य शोधकं तत्तदा ध्रुवम् ।। 96 ।।
सूतकं दीर्घकालीनं पूर्वं पश्चाद् यदा भवेत् ।
पूर्वार्द्धे चोत्तरार्द्धेऽपि तदल्पाशौचशोधकम् ।। 97 ।।
दीर्घकालीनं मृतकमेवमेव यदा भवेत् ।
तदाऽल्पमृतकाशौचशोधकं नात्र संशयः ।। 98 ।।
सर्वत्र शुद्धिविषये क्रियाकर्त्ता हि यो भवेत् ।
जातसूतकिनी नारी तयोः पूर्वं न शोधकम् ।। 99 ।।
स्वकाले च तयोश्शुद्धिः मुनिभिः परिकीर्त्तितः ।। 16 ।।

---

27. बृहन्मनुरपि – गुरुणा लघु बाध्येत लघुना नैव तद्गुरुः ।
षट्त्रिंशन्मतेऽपि – शावेन शुद्ध्यते सूतिर्न सूतिः शावशोधिनी ।।
(शु.सा.2/44)

दूरेऽन्तः प्रसवे श्रुते च मृतके शेषाहमाशौचकं[28]
सर्वेषामघवासरोपरि निशास्तिस्रो विनाशः श्रुतौ ।
यावद्वर्षमथ त्रिमासमपरं पक्षिण्यशौचं तत –
स्त्वेकाहं परतस्त्रिमासमुपरि स्नात्वेति लक्ष्मीधरः ।। 17 ।।

दूरस्थेन सपिण्डेन जाते मृतकसूतके ।। 100 ।।
दशाहमध्ये श्रूयेत यदा श्रवणवासरात् ।
अवशेषदिनैश्शुद्धिस्तदा ज्ञेया मनीषिभिः ।। 101 ।।
श्रवणाहाद् दशदिनं कदाचित् त्रिदिनं भवेत् ।
अशौचाहोत्पत्तिर्यदा प्रथमाब्दस्य मध्यतः ।। 102 ।।
विनाशश्रवणं ज्ञातेस्त्र्यहाशौचं प्रकीर्त्तितम् ।
अब्दात् परं त्रिमासान्तर्विनाशः श्रूयते यदि ।। 103 ।।
अशौचं स्यात् तदा ज्ञातेरेकरात्रिर्दिनद्वयम् ।
ततः परं त्रिमासान्तर्ज्ञातेर्मृत्युर्यदा श्रुतः ।। 104 ।।
अद्विकाहमशौचं स्यात् तत्परं नैव वर्त्तते ।
ऊर्द्ध्वंस्नानेन शुद्धिः स्यादिति लक्ष्मीधरोदितम् ।। 105 ।। 17 ।।

---

28. प्रवासमरणाशौचमधिकृत्य मनुः –
विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् ।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ।।
अतिक्रान्ते दशाहे च त्रिरात्रमशुचिर्भवेत् ।
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्यति ।। (मनु. 5/75–76)

पारस्करः – प्रोषितश्चेत् प्रेयाच्छ्रवणप्रभृतिकृतोदकाः कालशेषमासीरन्निति ।
(पा. गृ. सू. 3–10–43)

शुद्धिसारे गदाधरः – पुत्रः पित्रोर्दशाहोत्तरमरणश्रवणे स्नात्वोदकं कृत्वार्द्रवासाः तदवधि दशाहोक्तनियमान् कृत्वा नित्यं स्नानोदके च कृत्वा दशाहमशौचमाचरेत् । वर्षोत्तरमपि मरणश्रवणे तथैव सर्वं कुर्यात् ।
(शु. सा. 2/46)

29. कृत्य. शुद्धि. (पृ.34)

द्वेधाऽशौचं विनाऽन्तराश्रुतिमतः शेषाहमाशौचकं
तदा द्वे त्र्यहमात्रिपक्षसमयात् षण्मासतः पक्षिणी[30] ।
वर्षादेकमहर्मृतौ न जनने स्नात्वा तदूर्द्ध्वं शुचिः
खण्डाशौचमपि स्वकालपरतः श्रुत्वा शुचिः स्नानतः ॥ 18 ॥

इदानीं स्वमतं प्राह कालिदासो विशुद्धधीः ।
सूतिमृत्योर्यदा मध्ये स्यादशौचश्रुतिस्तथा ॥ 106 ॥
तदा शेषदिनैश्शुद्धिः पूर्वश्लोके च कीर्त्तिता ।
एतन्मते विशेषस्तु सांप्रतं परिकीर्त्यते ॥ 107 ॥
अशौचोदर्ध्वं सार्द्धमासमध्ये चेत् श्रूयते मृतिः ।
तदा श्रोतुस्त्र्यहाशौचं सपिण्डस्य प्रवर्त्तते ॥ 108 ॥
षण्मासान्तर्मृतिः श्रुत्वा अशौचं पक्षिणी भवेत् ।
वर्षमध्ये मृतिं श्रुत्वा एकाहाशौचमेव तु ॥ 109 ॥
दशाहोपरि सूतेश्च श्रुतौ दोषो न विद्यते ।
त्रिदिनं पक्षिणीरूपमेकाहमिति यन्मतम् ॥ 110 ॥
खण्डाशौचं तदाकर्ण्य स्नानमात्रं विधीयते ।
खण्डाशौचस्य मध्ये तु यदि तच्छ्रवणं भवेत् ॥ 111 ॥
अशौचं जायते तर्हि तदूर्द्ध्वं नास्ति दुष्टता ॥ 18 ॥

---

30. त्र्यहपक्षिण्यैकाहाद्यशौचविषये विश्वामित्रः –

आत्रिपक्षात् त्रिरात्रं स्यात् षण्मासात् पक्षिणी तथा ।
अहः संवत्सरादूर्ध्वं स्पृष्ट्वैवापो यथापरे ॥

अपरे समानोदका यथा तेषां स्नानमात्राच्छुद्धयन्ति तथैव संवत्सरोपरि श्रुत्वा स्नानमात्रादेव शुद्धयन्तीति विद्यावागीशः ।

(शु. च. पृ – 46 – 47)

दूरस्थोऽपि सूतौ मृतौ च पितरौ सर्वो दशाहात् परं
श्रुत्वोपोष्य तदादि चार्द्रवसनोऽशौचं दशाहं चरन् ।
स्नात्वाऽम्भस्तिलतर्पणं प्रतिदिनं कुर्याद् गतेऽपूजके
ध्यायंस्तन्नियमी सपूर्वमकृतां कुर्याच्च यत्नात् क्रियाम् ।। 19 ।।

दशरात्रादिमध्ये तु पित्रोर्मृत्युश्रुतिर्यदा ।। 112 ।।
तदा यथाविधि सुतः कालशेषाच्छुचिर्भवेत् ।
दशाहोपरि पूर्वाब्दे द्वितीयाब्देऽपि वा पुनः ।। 113 ।।
पित्रोर्वियोगश्रवणे सर्ववर्णसुतः पुनः ।
उपोष्य चाद्य दिवसे कर्म दशाह्निकं चरेत् ।। 114 ।।
स्नात्वा पित्रोः स्वरूपं च ध्यात्वा च तिलतर्पणम् ।
आचारात् चार्द्रवसनं शास्त्रोक्तनियमान्वितः ।। 115 ।।
श्रवणाहात् समारभ्य दशाहाशौचमाचरन् ।
भ्रात्रादिना[क] च केनापि यदि पित्रोः क्रिया कृता ।। 116 ।।
तथापि नियमं कुर्वन् दशाहाशौचमाचरेत् ।। 19 ।।

(क) - उपनीतेन भ्रात्रादिना ।

त्रीण्येवाघदिनानि[31] सव्रतमृते जातोऽपि चैकोदके[क]
स्युर्मातामहयोरथ श्वशुरयोरेकालये मातुले ।
दौहित्रे भगिनिसुते व्रतमृते जाते मृतेऽनौरसे
व्यावृत्ताऽजिहते क्रमर्त्त्विजि तथा याज्ये गृहे श्रोत्रिये ॥ 20 ॥

सापिण्ड्यानन्तरं[32] जाते ज्ञातावेवोदके[ख] पुनः ॥ 117 ॥
उपनीते मृते वाऽपि त्रिदिनं स्यादशौचकम् ।
तस्यात्मजस्य मरणे एकाहाशौचमेव तु ॥ 118 ॥
मातामही तद्भर्त्तुश्च मरणे त्र्यहमेव तु ।
श्वश्रु-श्वशुरयोर्मृत्युरेककालीनयोः पुनः ॥ 119 ॥
मातुलान्या मातुलस्य मृतयोस्त्र्यहमेव तु ।
दौहित्रस्योपनीतस्य भागिनेयस्य तादृशः ॥ 120 ॥
एकालये यदा मृत्युस्त्र्यहाशौचं तदा भवेत् ।
औरसव्यतिरेकेण क्षेत्रजादौ सूते मृते ॥ 121 ॥
जातेऽपि तत्त्र्यहाशौचं पण्डितैः परिकीर्त्तितम् ।
सम्मुखे क्षत्रिये युद्धे शस्त्रेण निहते यदि ॥ 122 ॥
कालान्तरमृते वाऽपि ज्ञातिः स्यात्त्रिदिनाच्छुचिः ।
वंशक्रमागतस्यापि मृतिः स्याद्दृत्विजो यदि ॥ 123 ॥

31. एकोदकानामशौचविषये मनुः -
जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते । (मनु - 5-71)

32. सपिण्ड-सकुल्यादीनामशौचविषये बृहस्पतिः -
दशाहेन सपिण्डास्तु शुद्ध्यन्ति प्रेतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुद्ध्यन्ति गोत्रजाः ॥
(कृत्य. शुद्धि. पृ - 11)

(क) एकोदके - अनुपनीते च इत्यर्थः ।
(ख) ज्ञातौ समानोदके इत्यर्थः ।

ऊढाया:[33] प्रसवे गृहे जनकयोस्तस्य तयोर्वा मृतौ
सस्त्र्याचार्यसुशिष्ययोः पतिपुनर्भूपांशुलानां मिथः ।
दैवाद्वज्रशिलाग्निशस्त्रपतनप्रायैर्मृते निर्गुणे
हिंस्रैर्वा त्र्यहमिच्छया विधिमृतेऽप्येतैरसाध्यान्तरे ।। 21 ।।

तथा मृतश्चेद् याज्यस्य त्र्यहाशौचं प्रवर्त्तते ।
स्वगृहागतविप्रस्य विशिष्टस्य मृतिर्यदा ।। 124 ।।
तदा तु गृहिणां प्रोक्तं त्र्यहाशौचं मनीषिभिः ।
अश्रोत्रियस्य मृत्युश्चेदेकाहं गृहिणां मतम् ।। 125 ।। 20 ।।
विवाहितायाः दुहितुः सूतकं चेत् पितुर्गृहे ।
जनन्याः जनकस्यापि त्र्यहाशौचं तदा मतम् ।। 126 ।।
तस्यास्तयोर्मृत्यौ सत्यां त्र्यहाशौचं मिथः स्मृतम् ।
आचार्याद्याः सुशिष्यस्याचार्यस्यापि मृतिर्यदा ।। 127 ।।
अन्योन्यं त्रिदिनाशौचं मुनिभिः परिकीर्त्तितम् ।
पत्न्याश्चोपपतेश्चापि पुनर्भ्वाश्च यथा मृतिः ।। 128 ।।
पांसुलायास्तथा मृत्यामन्योन्यं त्र्यहमेव तु ।
प्रमादाद् वज्रपाताद्यैः मृते ज्ञातौ च निर्गुणे ।। 129 ।।
काश्यपस्य मुनेर्वाचा त्र्यहाशौचं विधीयते ।
वज्रव्याघ्रजलाद्यैस्तु मृते ज्ञातौ च सद्गुणे ।।130 ।।
अङ्गिरोवचनात् तत्र पूर्णाशौचं जलक्रिया ।
सगुणा निर्गुणा वाऽपि ज्ञातयो बुद्धिपूर्वकम् ।। 131 ।।

33. ऊढानामशौचविषये वशिष्ठः –
प्रत्तानां तु स्त्रीणां त्रिरात्रमशौचं विज्ञायते । (व. धर्म. 4-18)
बृहस्पतिः – श्रावाशौचं त्रिरात्रं स्यान्महागुरुनिपातने ।
दुहितॄणां तु विन्नानां सर्ववर्णेष्वयं विधिः ।। (शु. सा. 2/52)

पक्षिण्यत मृता यदि श्वशुरकौ स्वस्त्रीयकौ मातुलौ[34]
दौहित्रोऽथ पितृसबान्धवजनौ पित्रोः स्वसा तत्पतिः ।
भ्रातासंस्करणे स्वसाऽपि च मिथः पित्रोश्च मातामही
तद्भर्त्ता च तदात्मजा यदि मृताः शिष्यो गुरुर्ऋत्विजः ॥ 22 ॥

आत्मघातं प्रकुर्वन्ति नाशौचं तत्र न क्रिया ।
असाध्यरोगिभिः हतो दुश्चिकित्स्यो यदा भवेत् ॥ 132 ॥
तस्येच्छयोपायमृतौ ज्ञातिः स्यात् त्रिदिनाच्छुचिः ॥ 21 ॥
एकस्थाने श्वशुरयोर्मृतौ बन्धोः दिनत्रयम् ॥ 133 ॥
एकग्रामे चान्यगृहे मृतावुक्ता च पक्षिणी ।
देशान्तरे तयोर्मृतावेकाहोरात्रमिष्यते ॥ 134 ॥
भागिनेयो मातुलश्च मातुलानी तथैव च ।
दौहित्रश्च मृता एते यदि स्थानान्तरे पुनः ॥ 135 ॥
पक्षिणीं समभिव्याप्याशौचं तत्र प्रवर्त्तते ।
पितृबन्धुश्चात्मबन्धुर्मातृष्वसा पितृष्वसा ॥ 136 ॥
एतयोश्चैव भर्त्तारो व्रती भ्राता तथैव च ।
विवाहितासु सा चापि मृता एते परस्परम् ॥ 137 ॥
पक्षिणीकालतः शुद्धा भवत्येव न संशयः ।
मातामहे पितुर्मातुस्तदभर्तारो तथैव च ॥ 138 ॥
तत्पुत्राश्च मृता एते पक्षिण्यां च सुतां गता ।
मातुः पितामही तस्याः भर्त्ता च म्रियते यदि ॥ 139 ॥

---

34. श्वशुर – मातुलादीनामशौचमुपजीव्य मनुः –
श्वशुरयोर्भगिन्यां च मातुलान्यां च मातुले ।
पित्रोः स्वसरि च प्रेते पक्षिणीं क्षपयेन्निशाम् ॥
(मिता. याज्ञ. 3–24)

मनुः – *मातुले पक्षिणी रात्रिः शिष्यर्त्विग्गुरुबन्धुषु ॥* (मनु 5–81)

एकाहं च विदूरता श्वशुरयोः श्यालैकवैवाहिके
मित्र-भ्रातृसहोदरे पितृगृहे स्त्रीसूतिमृत्योः कुले ।
मातुर्बन्धुषु गोद्विजार्थनिहतोपाध्याययाज्यश्च[35] ते
सम्राज्येकगुरावथ स्वनृपतौ सद्योऽतिरिक्तं मृते ।। 23 ।।

पक्षिणी कालतः शुद्धा जायते नात्र संशयः ।
अध्यापको गुरुस्तस्य पत्नी शिष्यस्तथैव च ।। 140 ।।
कुलक्रमागतं त्यक्त्वा येऽन्ये वै शिष्टयाजकाः ।
यत्र कुत्र मृता एते पक्षिण्याशौचकारिणः ।। 141 ।। 22 ।।
श्याले वैवाहिके मित्रे मातुमातुश्च सोदरे ।
मृते सम्बन्धिनामुक्तमेकाहाशौचमात्रकम् ।। 142 ।।
पितुर्गृहे सुतायाश्च सूतिमृत्योश्च सम्भवः ।
तदा पितृकुले जाताः शुद्धा एकाहमात्रतः ।। 143 ।।
मातृबान्धवमृत्यौ च गोविप्रार्थं मृते जले ।
एकाहाशौचमुक्तं हि पण्डितैर्नात्र संशयः ।। 144 ।।
उपाध्याये च तद् भार्या तत्पुत्रेषु मृतेषु च ।
सम्राज्यभाजिनृपतौ मृते त्वेकाहमीरितम् ।। 145 ।। 23 ।।

---

35. गोब्राह्मणार्थहताशौचमाह पराशरः -

ब्राह्मणार्थं विपन्नानां दण्डिनां गोग्रहेषु च ।
आहवेषु विपन्नानामेकरात्रमशौचकम् ।। (परा. स्मृ. 3-31)

सद्यःशौचविषये मनुः -

डिम्भाहवहतानां च विद्युता पार्थिवेन च ।
गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ।।
उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च ।
सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः । (मनु. 5-95,98)

बिष्णुः - आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वशुर्यसहाध्यायिशिष्येषु अतीतेषु एकरात्रेण । (बिष्णु. धर्म. सू. 22.44)

सद्यो[36] हिंस्रहते धियाऽथ पतिते गोविप्रडिम्भैर्मृते -
राज्ञा पूर्वपराधिकेऽपि च धिया त्वम्भोविषाग्न्यादिभिः ।
शालावुत्तसुताऽथवाभिचरितक्लीबाभिशस्तोऽप्यथ
नाशौचं द्विविधं तदा श्रुतिमतां प्रारब्धकर्मस्वपि ॥ 24 ॥

अनिच्छया द्विजैर्गोभिः डिम्भैर्वा म्रियते तु यः ।
वधयोगादपराधात् यो राज्ञा वधमागतः ॥ 146 ॥
तदा सर्वसपिण्डानां सद्यःशौचं प्रकीर्त्तितम् ।
श्यालपत्न्योश्च भगिनिपतिश्च दुहितुः पतिः ॥ 147 ॥
नपुंसकोऽभिशप्तश्च ब्राह्मणाद्यैर्भवेत्तु यः ।
क्रियते यस्य चेच्छायामभिचार इमे मृताः ॥ 148 ॥
यदा तत्तत् सपिण्डादेः सद्यःशौचं विधीयते ।
सूतकं मृतकं वाऽपि सपिण्डैर्निसृतं प्रियैः ॥ 149 ॥
यदा तदा च काम्यादि कर्म कार्यैकदूषणम् ।
अशौचिनोरज्ञानात्तु भुंजाना याजकादयः ॥ 150 ॥
कुर्वन्तो कर्मजातं हि दूषणं नैव जायते ।
प्रारब्धे च विवाहादि यज्ञश्राद्धजपादिषु ॥ 151 ॥
तन्मध्ये द्विविधाशौचं श्रवणं जायते यदि ।
तदा समाप्तिपर्यन्तं कर्म कार्यं न संशयः ॥ 152 ॥

36. सद्यःशौचाभिधाने यमः -

डिम्भाशनिहतानां च तथैव प्राणसत्रिणाम् ।
नदीश्वापददंष्ट्रिभ्यः सद्यःशौचं विधीयते ॥ (कृत्य. शुद्धि. पृ.46)

सुमन्तुः - भृग्वग्निजलसङ्ग्रामे देशान्तरे संस्थाप्याशनिमहाध्वनिकानामुदकक्रिया कार्या । सद्यःशौचं भवति ।

(कृत्य. शुद्धि. पृ - 48)

सद्यः[37] सत्रिपुराश्रमिव्रतयतिब्रह्मैकलब्धपदां
स्वे स्वे कर्मणि शिल्पिदासभिषजामिष्टस्य राज्ञा द्विजैः ।
ऋत्विग्दीक्षितयोः निमन्त्रितसदादाने महोपद्रवे
भृत्यामात्यमहीभुजां च सकलाशौचेन शुद्धिः स्मृता ॥ 25 ॥

तत्र ये कर्म कर्त्तारो यजमानर्त्विगादयः ।
तेषामशौचं नास्त्येव कर्मान्ते स्यादशौचकम् ॥ 153 ॥
अवसाने कर्मणश्च यद्यशौचावशेषता ॥ 24 ॥
सत्री च ब्रह्मचारी च गृहीतव्रत एव च ॥154 ॥
संन्यासी ब्रह्मविच्चैव ग्रस्तोऽत्यन्ता यदा च यः ।
सपिण्डाशौचपतने सद्यस्ते शुचयः स्मृताः ॥ 155 ॥
शिल्पिनां दासवर्गाणां भिषजां स्व स्व कर्मणि ।
अशौचद्वयमेतेषां जनने मरणे तथा ॥ 156 ॥
सद्यश्शौचं च विज्ञेयं मुनिभिः यदुदीरितम् ।
मूर्धाभिषिक्तो राजा हि यस्याज्ञाकारिणः पुनः ॥ 157 ॥
शुद्धिमिच्छन्ति तस्यापि सद्यश्शौचं प्रकीर्त्यते ।
संभूय बहवो विप्रा शुद्धिमिच्छन्ति यस्य वै ॥ 158 ॥
सूतके मृतके वाऽपि सद्यश्शुद्धो स जायते ।
ऋत्विजो दीक्षितश्चापि श्राद्धाद्यामन्त्रितो द्विजः ॥ 159 ॥

37. *अन्येषां सद्यःशौचभाजां विषये याज्ञवल्क्येन यथा –*
ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वताम् ।
सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥
दाने विवाहे यज्ञे च सङ्ग्रामे देशविप्लवे ।
आपद्यपि च कष्टायां सद्यःशौचं विधीयते ॥ (या. स्मृ. 3/28–29)
दक्षः – *स्वस्थकाले त्विदं सर्वमशौचं परिकीर्त्तितम् ।*
आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम् ॥ (6–18)

स्वं वर्णं च वहेद् दहेदनुगतः[38] स्पृष्ट्वा शवस्थो रुदन्
स्नात्वाऽन्यं यदि तत्समस्त्रिदिवसैर्दग्धेऽस्थिपर्णेन[39] चेत् ।
बन्धोर्निहरणे त्र्यहात् सह वसन्नह्नाऽन्यवासेऽन्नभुक्
तुल्यस्तैः शवसंस्कृतं च विधिना कृत्वा क्रिया स्याच्छुचिः ॥ 26 ॥

दानशीलश्च यो मन्त्रः शुद्धास्ते स्व स्व कर्मणि ।
स्वोपद्रवे च देशेऽपि भृत्येऽमात्ये तथैव च ॥160 ॥
महीपतौ च द्विविधाशौचं दैवं विधीयते ॥ 25 ॥
स्वजातीयशवस्यापि वहनं दहनं तथा ॥ 161 ॥

---

38. शववहनदहनस्पर्शनादिषु अशौचमाह पराशरः -
अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।
पदे पदे यज्ञफलमानुपूर्व्याल्लभन्ति ते ॥
प्रेतस्पर्शनसंस्कारैर्ब्राह्मणो नैव दुष्यति ।
वोढ़ा वाऽप्यग्निदाता वा सद्यः स्नात्वा शुचिर्भवेत् ॥

(कृत्य. कल्प. शुद्धिः पृ - 59)

39. कालिदासस्य नामग्रहणं कृत्वा गदाधरः कथयति -
साग्नेरेवास्थिदाहो भवति चयनिनः कालिदासा अबोचन्
तत्राशौचं त्र्यहं स्यादिति निगमविदोऽन्ये दशाहं ब्रूवन्ति ॥

(शु. सा. 2/4 श्लो)

साग्नेरेवास्थिदाहः त्रिरात्राशौचानुवृत्तौ कालिदासचयनिनः ''दग्धेऽस्थिपर्णे नरे'' (शु. च. श्लो. 26) इति ।

बौधायनः - परशवोपस्पर्शनेऽनभिसन्धिपूर्वं सचेलोऽपः स्पृष्ट्वा सद्यःशुचिर्भवति । अभिसन्धिपूर्वं त्रिरात्रम् । ऋतुमत्यां च ।

(बौ. धर्म. 1/5/11/30-32)

मनुरपि – *अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च ।*
स्नात्वा सचेलः स्पृष्ट्वाग्निः घृतं प्राश्य विशुद्धयति ॥
दिवाकीर्त्तिमुदक्यां च पतितं सूतिकां तथा ।
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुद्धयति ॥ (मनु. 5-103,85)

स्मृत्यर्णवादुद्धृतसारशीकरैः
पूता बुधाः सज्जनमज्जनोचिता ।
कृतातिसेवा सुरसा मलापहा
विगाह्यतां शुद्धिविधानवापीका[40] ॥ 27 ॥

इति श्रीकालिदासचयनिविरचिता शुद्धिचन्द्रिका
समाप्ता ॥ 0 ॥

यथा करोत्यनुगमं केवलं स्पर्शनं तथा ।
सजातीयशवार्द्रास्थिस्पर्शनं कुरुते यदि ॥ 162 ॥
अस्थिसञ्चयमध्ये तु शोकाविष्टतया रुदन् ।
तादृशश्च सजातीयः स्नानमात्रेण शुद्ध्यति ॥ 163 ॥
सजातीयशवस्यापि दहनादिं यदाऽऽचरेत् ।
तत्सपिण्डाशौचशुद्ध्या शुद्धिस्तस्य न संशयः ॥ 164 ॥
विदेशस्थमृतस्यापि देहलाभो यदा कदा ।
तदस्थिलाभे च तदा पर्णदाहे तथा पुनः ॥ 165 ॥
अस्थ्यभावे पर्णनरः दाहश्चेत् क्रियते बुधैः ।
दाहात् परं सपिण्डादिस्त्रिदिनेन च शुध्यति ॥ 166 ॥
मातुश्च बान्धवादीनां वाहदाहादिकं चरन् ।
तत्पुत्रादि गृहे स्थित्वा त्रिदिनेन विशुध्यति ॥ 167 ॥
यदा वसत्यन्यगृहे तदैकाहेन शुध्यति ।
अशौचिकस्यान्नं भुंक्ते चेद्दशाहेन शुध्यति ॥168 ॥
अतो हेतोश्च पुत्रादि विधिनाशे ह्यसंस्कृतम् ।
विधिना च क्रियां कृत्वा विधिना शुद्धितां व्रजेत् ॥ 169 ॥ 26 ॥
कालिदासेन पूर्वार्थां निर्मिता शुद्धिचन्द्रिका ।
व्यक्तार्था हि हितार्था च कृता शान्तिरथेन या ॥ 170 ॥

या कालिदासेन कृता महत्तरा
मतां बुधानां किल शुद्धिचन्द्रिका ।
सा साम्प्रतं शान्तिरथेन निर्मिता
नृणां हिताय स्फुटशुद्धिचन्द्रिका ॥ 171 ॥

इति श्रीशान्तिरथकृता शुद्धिचन्द्रिकाटीका स्फुटशुद्धिचन्द्रिका समाप्ता ॥ 0 ॥

श्रीरामचन्द्रनृपते कुलपद्मसूर्य -
(श)शाङ्के चतुर्विंशत्यङ्के परिपूर्णभावः ।
प्राप्ता सुधीषणदिने च मुकुन्दतिथौ
सा शुद्धिरत्र कथिता खलु चन्द्रिकेयम् ॥ 1 ॥
शिवेति परमेशेति शङ्करेति हरेति च ।
पार्वतिप्राणनाथेति वदन्ति हे नीलन्तरम् ॥ 2 ॥

☆☆☆

40. सुधा - स्मृतिवाङ्मयरूपकसमुद्रात् अमृतमयानि पवित्रप्रायाणि प्रयोजनीयवचनानि संगृह्य मयाऽत्र उपस्थापितानि सन्ति । तत्र तत्त्वजिज्ञासापरायणाः शिष्टाः गाढनिमज्जनं कृत्वा स्वीयबुद्धौ सन्निहितं मलरूपमज्ञानं दुरीकुर्वन्तु । इयं च शुद्धिचन्द्रिका आयतनेन परिसीमिताऽपि गमीरतत्त्वसन्निविष्टा, यथा वापी स्वल्पे स्थाने निखनिताऽपि अपरिमितं जलं धारयति, तथा चेयमित्यर्थः ।

इति भरद्वाजगोत्रोत्पन्नेन
श्रीमता पण्डितजयकृष्णमिश्रशर्मणा कृता
सुधाटिप्पणी समाप्ता

☆☆☆

सुधाकृद्विवृत्तिः

विख्याता भारते नो बुधजनमहिता चन्द्रिका शुद्धिपूर्वा
यत्कर्त्ता सर्वमान्यः स्मृतिवचनगुरुः कालिदासो विधिज्ञः ।
यन्नाम्ना सार्द्धमास्ते पदमपि चयनी कायशुद्धौ यदीयो
ग्रन्थो विद्वद्वराणां स्मृतिवचनकृतामुद्धृतौ कीर्त्तिमेति ।। 1 ।।

विराजते या भुवि शुद्धिचन्द्रिका
तदीयटीका स्फुटशुद्धिचन्द्रिका ।
महीयसा शान्तिरथेन निर्मिता
विभाति विद्वज्जनचित्तहारिणी ।। 2 ।।

यथा मणिः संस्कृतिमाप्य राजते,
तथा च टीका बहुकालदूषिता ।
अतोऽस्मि संपादनकर्मतत्परो
मुदे बुधानां जयकृष्णसंज्ञकः ।। 3 ।।

मदीयकार्य्यस्य विलोकनात्परं
बुधावली तुष्यति चेन्ममान्तरम् ।
प्रकाममानन्दमवाप्स्यति क्षणात्
कृपा गुरोर्मे सफला तदा भवेत् ।। 4 ।।

☆☆☆

शुद्धिचन्द्रिकायाः श्लोकपादानुक्रमणी

श्लोकांशाः	श्लोकसंख्या	श्लोकांशाः	श्लोकसंख्या
अङ्गाशौच	3	ताते जीवति	13
अन्त्याहेऽथ	14	तुर्ये स्पर्शे	7
आदन्ताद्	10	तुल्यस्तैः	26
आशौचे द्वि	15	तेने सुधी	1
ऊर्ध्वं पूर्ण	9	तेषां चैक	12
ऊढ़ायाः	21	त्याज्यं पैत्र्य	4
ऋत्विग्	25	त्रीण्येवाघ	20
एकाहं च	23	त्रीण्येवात्र	8
एकाहाद्	6	त्रेताग्नि	6
कर्मार्हा	2	थोढाऽनूढ	11
कुर्याज्जातक	5	दन्तः सूति	8
कृतातिसेवा	27	दन्ताधः	11
खण्डाशौच	18	दीर्घाल्पाऽपि	16
खातेनाद्वि	9	दूरस्थोऽपि	19
गर्भाष्टादि	11	दूरेऽन्तः	17
ज्ञातेश्चा	9	दैवाद्वज्र	21
ज्ञातौ वा	8	दौहित्रे	20
तत्सप्ताष्ट	8	दौहित्रोऽथ	22
तद्वत् सर्व	3	द्वैजं द्वित्रि	11
तद्भर्ता	22	द्वैधं दीर्घ	16
तदा द्वे	18	द्वैधाशौच	18

द्वैधाशौच	15	यावद्वर्ष	17
ध्यायंस्त	19	योगो याव	14
ध्वान्तान्ध	1	राज्ञा पूर्व	24
नग्निमन्त्र	6	वर्षादेक	18
नाडीच्छेदनतः	5	वाग्दानो	10
नाशौचं	24	विगाह्यतां	27
नाशौच्यन्न	4	विप्रक्षत्रिय	2
पक्षिण्यत	22	विप्रादे	12
पञ्चसप्त	3	व्यावृत्ताजि	20
पित्रोः प्राग्	9	शालावुत्त	24
पुत्राणामस	13	श्राद्धे मासिक	4
पुत्रीमज्जनतो	2	श्रीकालि	1
पूता बुधा	27	श्रुत्वोपोष्य	19
पूर्वं वा	16	सद्वेदोऽपि	6
प्रेतकर्म	5	सद्यः सत्रि	24
बन्धोर्निहरणे	26	सद्यो ज्ञाति	10
भृत्यामात्य	25	सद्यो हिंस्त्र	24
भ्रातासंस्क	22	सन्ध्या पञ्च	4
भ्रातुश्चार	10	सम्राज्येक	23
मन्वादि	1	सर्वाशौच	16
मातुर्बन्धु	23	सर्वे वा	3
मित्रभ्रातृ	23	सर्वेषामघ	17
यावदभू	15	सस्त्र्याचार्य	21

सूतौ सूतिरथ	14	स्वाम्युक्तं	12
सोर्द्धवं जात	7	स्वाशौचं	13
स्त्वेकाहं	17	स्वं वर्णं	26
स्नात्वाऽन्यं	26	स्वे स्वे कर्म	25
स्नात्वाऽम्भ	19	हिंस्त्रैर्वा	21
स्मार्त्ताग्ना	5	हीनानां	13
स्मृत्यर्णवा	27	होरात्रेषु	14
स्यादर्धे यदि	15	होरात्रैरथ	2
स्युर्मातामह	20		

☆☆☆

शुद्धिचन्द्रिकाटीकायाः

स्फुटशुद्धिचन्द्रिकायाः श्लोकार्धानुक्रमणी

श्लोकांशाः	टीकाश्लोकसंख्या/ मूलश्लोकसंख्या	श्लोकांशाः	टीकाश्लोकसंख्या/ मूलश्लोकसंख्या
अकृतेन	17/5	अन्योन्यं	128/21
अङ्गाशौचे	7/3	अपरो	29/7
अङ्गाशौचं	84/14	अब्दात्	103/17
अङ्गिरो	131/21	अवशेष	101/17
अतो हेतो	169/26	अवसाने	154/24
अथ वास	10/3	अशुद्धी	16/5
अदन्तात्	37/9	अशौचं	112/18
अद्विकाह	105/17	अशौचं	11/3
अद्विवर्ष	47/9	अशौच	83/14
अधीत	21/6	अशौचयोः	83/14
अधीत	24/6	अशौचस्या	90/16
अध्यापको	140/22	अशौचद्वय	156/25
अनिच्छया	146/24	अशौचा	102/17
अन्त्याह	82/14	अशौचिना	14/4
अन्यत् सर्वं	18/5	अशौचिनो	150/24
अन्यत्रा	60/11	अशौचिक	168/26
अन्यथा	20/5	अशौचे च	17/5
अन्यस्मिन्	35/8	अशौचो	108/18
अन्येन	19/5	अश्रोत्रियस्य	125/20

असंपृक्त	22/6	ऊर्ध्वं स्नाने	105/17
असंपृक्तो	24/6	ऋत्विजो	159/25
असाध्य	132/21	एकग्रामे	134/22
अस्थिसञ्चय	163/24	एकस्थाने	133/22
अस्थ्यभावे	166/24	एकात्मक	93/16
अहोरात्रं	79/14	एकालये	121/20
अहोरात्रेण	37/9	एकाहात्	32/8
आचतुर्थ	6/3	एकाहाशौ	144/23
आचारात्	115/19	एकाहेन	66/12
आचार्याद्याः	127/21	एतन्मते	107/18
आत्मघातं	132/21	एतयोश्चैव	137/22
इतरे चैव	14/4	औरस	121/20
इदानीं	106/18	कर्मणो चैका	4/2
उक्ता एते	25/6	कालादक्र	8/3
उत्कृष्ट	76/13	कालान्तर	123/20
उत्कृष्ट	79/13	कालिदासेन	170/27
उत्तरार्द्धे	89/15	काश्यपस्य	130/21
उपवीत	42/9	कुमार	15/5
उपनीते	118/20	कुर्वन्तो	151/24
उपाध्याये	145/23	कुलक्रमा	141/22
उपोष्य	114/19	क्रमः प्रोक्तो	68/12
ऊर्ध्वमस्ना	48/9	क्रियते	148/24

क्षत्रस्य	67/12	ततश्चा	62/11
क्षत्रियायां	70/12	ततोऽङ्गस्पर्शे	8/3
खण्डाशौचं	111/18	तत्तत्क्रिय	44/9
खण्डाशौचे	7/3	तत्पुत्रादि	167/26
गर्भाष्टमा	41/9	तत्पुत्राश्च	139/22
गर्भाष्टमा	59/11	तत्र ये	153/24
चतुर्थदिवसे	27/7	तत्सपिण्डा	164/26
चूडाकाला	40/9	तथा ज्ञाति	40/9
चूडाकाला	52/10	तथापि	117/19
जनन्याः	126/21	तथापि	95/16
जातकर्मा	16/5	तथा मृत	124/20
जातसूत	99/16	तदस्थिलाभे	165/26
जातस्य	30/7	तदाघवृ	89/15
जातेऽपि	122/20	तदा तु	125/20
जाते मृतौ	31/8	तदा पितुश्च	38/9
जामले	36/8	तदा पितृ	56/10
जायते श्रू	85/15	तदा पितृ	143/23
जायमानेषु	43/9	तदा पूर्वं	87/15
ज्ञातयः	33/8	तदा यथा	113/19
ज्ञातयः	81/14	तदाऽल्प	98/16
ततः परं	104/17	तदा शूद्र	64/11
ततः पितृ	93/16	तदा शेष	107/18

तदा श्रोतु	108/18	दशाहोप	113/19
तदा षड्	65/12	दन्तचूडो	42/9
तदा सर्व	147/24	दन्तात् प्राक्	39/9
तदा समा	152/24	दन्तोत्पत्ते	61/11
तन्मध्ये	152/24	दानशील	160/25
तस्यात्मज	118/20	दारादि	21/6
तस्यास्तयो	127/21	दासानां	71/12
तस्येच्छायो	133/21	दाहकार्ये	47/9
तादृशश्च	163/26	दाहात् परं	166/26
तृतीयमा	28/7	दीर्घकाली	98/16
तेषामशौच	153/24	दूरस्थेन	100/17
त्रिदिनं	110/18	देशान्तरे	134/22
त्रिदिना	96/16	दौहित्रश्च	135/22
त्रिवर्षात्	51/10	दौहित्रस्यो	120/20
त्रिवर्षोन	61/11	द्वादशाहात्	2/2
त्र्यहत्वे	62/11	द्विवर्ष	53/10
दशरात्रा	112/19	द्विवर्षोन	46/9
दशरात्रादि	34/8	न जीवत्पि	75/13
दशाहम	101/17	नपुंसको	148/24
दशाहात्	96/16	नित्यं नैमि	12/4
दशाहान	4/2	निरग्ने	10/3
दशाहोपरि	110/18	नृणां हिता	171/27

नोदकं	46/9	पुत्रो भव	91/16
न्यूनं चेत्	80/14	पुनः सहो	85/15
पक्षिणीं	136/22	पुनर्नव	33/8
पक्षिणीं	140/22	पूर्णवेदो	23/6
पक्षिणी	138/22	पूर्णाशौचं	41/9
पञ्चदशाहैस्तु	3/2	पूर्णाशौच	41/9
पञ्चमे	27/7	पूर्वं च	49/10
पञ्चाब्दादौ	48/9	पूर्वं त्रिव	39/9
पत्न्याश्चोप	128/21	पूर्वपश्चाह	86/15
पांसुलाया	129/21	पूर्वार्द्धे	95/16
पितुर्मातु	91/16	पूर्वार्द्धे	97/16
पितुर्मृति	92/16	पूर्वाह	87/15
पितृजाती	74/13	पूर्वोक्तानां	86/15
पितृबन्धु	136/22	प्रमादात्	129/21
पितृमात्रो	35/8	प्राग् वैश्या	69/21
पितृगृहे	143/23	प्रारब्धे	151/24
पित्रीयं	13/4	प्रेतोद्दिष्टं	12/4
पित्रोर्वियोग	114/19	बालस्य	57/11
पित्रोश्च	57/10	ब्राह्मणो	60/11
पित्रोस्तु	36/8	भर्त्तुश्च	77/13
पुत्राणाम	73/13	भागिनेयो	135/22
पुत्रीमज्जन	3/2	भ्रातुश्च	51/10

भ्रातुस्त्रि	52/10	मूर्धाभिषि	157/25
भ्रात्रादिना	116/19	मृताहगण	9/3
मतां बुधा	71/27	मृतिश्चेद्	94/16
महीपतौ	161/25	मृतिसूत्योः	76/13
मातापित्रोः	49/10	मृते सम्ब	142/23
मातापित्रोः	90/16	मृतिश्चेद्	94/16
मातामही	119/20	यत्र कुत्र	141/22
मातामहे	138/22	यथा करो	162/26
मातुः पिता	139/22	यदशौच	58/11
मातुः सर्व	34/8	यदा तदा	150/24
मातुर्भ्रातु	56/10	यदा तत्र	149/24
मातुर्मृतक	92/16	यदा दासा	72/12
मातुलान्या	120/20	यदा वत्स	168/26
मातुश्च	167/26	यदा शूद्र	66/12
मातृजाती	75/13	यदि जीव	74/13
मातृबान्ध	144/23	यदोत्तरा	88/15
मासयुग्मा	38/9	या कालि	171/27
मासयुज्य	26/7	रदाद्युत्पत्ति	45/9
माससं	28/7	वंशक्रमा	123/20
मासात् परं	5/2	वज्रव्याघ्र	130/21
मासिकं	9/3	वधयोगा	146/24
मासिकं	13/4	वर्षमध्ये	109/18

वस्तुसंस्कार	25/6	शूद्रायां	70/12
वाग्दान	54/10	श्यालपत्न्यो	147/24
वाग्दाना	55/10	श्याले वैवा	142/23
विघ्नराजं	1/1	श्रवणाहा	102/17
विज्ञेयं मृत	5/2	श्रवणाहात्	116/19
वितरेत्	15/5	श्रौताग्नि	20/6
विदेशस्थ	165/26	षड्दिनेन	67/12
विद्यया	77/13	षण्मासा	109/18
विधिना च	169/26	षण्मासादौ	45/9
विनाश	103/17	षण्मासो	50/10
विप्रः शूद्रां	69/12	षोडशाब्दा	63/11
विप्रस्य	65/12	षोडशाब्दा	64/11
विवाहिता	137/22	संन्यासी	155/25
विवाहितायाः	126/21	संपूर्ण	30/7
विवाहो	50/10	संपूर्णा	59/11
वैश्यः सप्त	6/3	संपूर्णा	63/11
वैश्यस्य	68/12	संप्लुतायाः	53/10
वैश्ये च	58/11	संभूय	158/25
व्यक्तार्था	170/27	सगुणा	131/21
शाखान्तरे	44/9	सजातीय	162/26
शिल्पिनां	156/26	सजातीय	164/26
शुद्धिमिच्छ	158/25	सत्री च	154/25

सद्यः शौचं	32/8	सूतकान्त	80/14
सद्यस्शौचं	157/25	सूतके	159/25
सद्यो भव	54/10	सूतके ब्राह्म	2/2
सपिण्ड	19/5	सूतके मृत	84/15
सपिण्डाशौच	155/25	सूतिमृत्योः	106/18
सप्तमा	26/7	सूतेः प्रजा	94/16
सप्तमे	31/8	सूयते	88/15
सम्मुखे	122/20	स्नात्वाऽपि	115/19
सम्राज्य	145/23	स्मार्त्ताग्नि	22/6
सर्वत्र शु	99/16	स्मार्त्ताग्नि	23/6
सर्ववर्णस्य	26/7	स्वकाले	100/16
सर्वे सङ्कर	11/3	स्वगृहा	124/20
सहोदरा	78/13	स्वजाती	161/26
सांवत्सरिक	43/9	स्वामिनो	71/12
सापिण्ड्या	117/20	स्वामिनि	73/12
सायं प्रातः	18/5	स्वामीजी	72/12
सा साम्प्रतं	171/27	स्वोपद्रवे	160/25
सूतकं	97/16	हीनवर्ण	79/13
सूतकं	149/24	हीनवर्णा	78/13

☆☆☆

सहायकग्रन्थसूची

अग्निपुराणम् - नागप्रकाशक, दिल्ली।

आङ्गिरसस्मृतिः- आड्यारलाइब्रेरी, मद्रास, 1953

आपस्तम्बधर्मसूत्रम् - संपा, जर्ज वुहलर, वि. ओ. आर. आइ, पुना, 1932

कूर्मपुराणम् - नाग पब्लिशर्स, दिल्ली, 1983

कृत्यकल्पतरुः - शुद्धिकाण्डः - लक्ष्मीधरभट्टः - गायकवाड ओरियण्टाल सिरिज, वरोदा, 1950

गौतमधर्मसूत्रम् - पण्डितकुलमणिमिश्रकृतं सूक्ष्माटीकासहितम्, नारायणप्रेस, पुरी, 1991

छन्दोगपरिशिष्टम् - कात्यायनः,एसियाटिक सोसाइटि, कलिकता।

पराशरमाधवीयः - माधवाचार्यः - एसियाटिक सोसाइटि, कलिकता, 1974,

पारस्कर गृह्यसूत्रम् - प्रका. श्रीसदाशिवकेन्द्रीयसंस्कृत-विद्यापीठम्, पुरी, 1981

बौधायनधर्मसूत्रम् - चौखम्वा संस्कृत सिरिज अफिस्, वाराणसी, 1972

ब्रह्मपुराणम् - हिन्दीसाहित्यसम्मेलन, प्रयाग, 1976

मनुस्मृतिः - मन्वर्थमुक्तावलीसहिता - मोतिलालवनारसीदास, वाराणसी, 1990

याज्ञवल्क्यस्मृतिः - मिताक्षराटीकासहिता - नागप्रकाशक, दिल्ली, 1985

वसिष्ठधर्मशास्त्रम् – भण्डारकर ओरियण्टाल रिसर्च इन्ष्टीच्युट, पुना, 1931

विष्णुस्मृतिः – चौखम्वासंस्कृतसिरिजअफिस, वाराणसी, 1962

शुद्धिचन्द्रिका – (आदित्याचार्यकृतषडशीतिग्रन्थस्य टीका) नन्दपण्डितः, चौखम्वा संस्कृत सिरिज अफिस्, वाराणसी, 1928

शुद्धिचन्द्रिका – कालिदासचयनी, उत्कलभाषया प्रकाशिता, कटक, 1972

शुद्धिचन्द्रिका – कालिदासचयनी (विद्यावागीशटीकासहिता) सम्पा. डा. विश्वनाथस्वाईं, पुरी, 2000

शुद्धितत्त्वम् – रघुनन्दनभट्टाचार्यः जीवानन्दविद्यासागर-सम्पादितम्, कलिकता।

शुद्धिकौमुदी – गोविन्दानन्दः, एसियाटिक सोसाइटि, कलिकता, 1905

शुद्धिचिन्तामणिः – वाचस्पतिमिश्रः, कामेश्वरसिंह दरभंगासंस्कृतविश्वविद्यालयः, दरभंगा, विहार।

शुद्धिप्रकाशः – मित्रमिश्रः – चौखम्वा संस्कृत सिरिज अफिस्, वाराणसी, 1987

शुद्धिप्रकाशः – विश्वम्भरविद्याभूषणः – अप्रकाशितः शोधनिबन्धः।

शुद्धिमयूखः – नीलकण्ठभट्टः – चौखम्वा संस्कृत प्रतिष्ठान, दिल्ली, 1986

शुद्धिसर्वस्वम् - कृष्णमिश्रः - सम्पा. डा. विश्वनाथस्वाईं, पुरी, 1993

शुद्धिसारः-द्वितीयभागः - गदाधरराजगुरुः, सम्पा. डा. जयकृष्णमिश्रः, श्रीविहारः, पुरी, 2001.

स्मृतिचन्द्रिका - शुद्धिकाण्डः - देवणभट्टः, नागप्रकाशक, दिल्ली, 1988

हारलता - अनिरुद्धभट्टः - एसियाटिक सोसाइटि, कलिकता, 1908

संवर्त्तस्मृतिः - स्मृतिसन्दर्भः, नागप्रकाशक, दिल्ली- 7, 1988

पैठीनसिस्मृतिः - स्मृतिसन्दर्भः, नागप्रकाशक, दिल्ली- 7, 1988

यमस्मृतिः - स्मृतिसन्दर्भः, नागप्रकाशक, दिल्ली- 7, 1988

शंखलिखितधर्मसूत्रम् - स्मृतिसन्दर्भः, नागप्रकाशक, दिल्ली-7, 1988

हारीतस्मृतिः - स्मृतिसन्दर्भः, नागप्रकाशक, दिल्ली- 7, 1988

दक्षस्मृतिः - स्मृतिसन्दर्भः, नागप्रकाशक, दिल्ली- 7, 1988

आपस्तम्बस्मृतिः - स्मृतिसन्दर्भः, नागप्रकाशक, दिल्ली- 7, 1988

☆☆☆